    2.1.7 bauddhamatadvayam
  2.2 jñānākārapakṣadūṣaṇam
    2.2.1 jñānākāro nābhilāpasaṃsargayogyaḥ
    2.2.2 kalpanā svasaṃvittāv avikalpikā
    2.2.3 jñānākārasya bāhyatvam
    2.2.4 jñānākārasyāvācyatvam
  2.3 alīkaśabdārthapakṣaḥ

    2.3.1 dṛṣṭasadṛśasamāropasyānupapannatvam
    2.3.2 bāhyavidharmāropaḥ
    2.3.3 sādṛśyasamarthanam
      2.3.3.1 atatkārivyāvṛttiḥ
      2.3.3.2 darśanam eva kāryam
      2.3.3.3 ekapratyavamarśahetutvam
      2.3.3.4 upasaṃhāraḥ
      2.3.3.5 jñānākāravādinām api sādhāraṇaḥ ślokaḥ
  2.4 anyavyāvṛttiniṣṭhatvam
    2.4.1 bhāvābhāvasādhāraṇarūpāvasānam
    2.4.2 nañyogiśabdanidarśanena sādhanam
    2.4.3 atyantavisadṛśasya bāhyatvagrahaṇam
    2.4.4 niyatarūpāvadhāraṇam
    2.4.5 upasaṃhāraḥ
3 bauddhamatadūṣaṇam
  3.1 agonivṛtter āśrayaḥ
    3.1.1 agonivṛttir na svatantrā
    3.1.2 agonivṛttir nānyāśritā
    3.1.3 nāropitaṃ rūpam āśrayaḥ
      3.1.3.1 asaṃketaviṣayaḥ
      3.1.3.2 kalpanopādānasya nānugatiḥ
      3.1.3.3 āropitasya rūpasyāsvābhāvikatvam
      3.1.3.4 nāropitānām ekatvam
        3.1.3.4.1 pratisaṃdhātur abhāvāt
        3.1.3.4.2 vikalpasya pratisaṃdhānānīśitvam
        3.1.3.4.3 bhedānavasāyaḥ
        3.1.3.4.4 mahaty āropaparaṃparā
  3.2 agoniṣedho govidhipūrvakaḥ
  3.3 atatkāriṇaḥ
    3.3.1 arthakriyākāriṇaḥ
    3.3.2 ekadarśanakāryatvam

3.3.3 ekapratyavamarśahetutvam
3.3.4 viṣayābhedaḥ
3.3.5 upasaṃhāraḥ
3.4 kalpitākāraviṣayatvam
3.4.1 āropitākāraviṣayatvam
3.4.2 avasīyamānākāraviṣayatvam
3.4.3 āropitākārāsādhāraṇatvam
3.5 niravaśeṣaparidṛṣṭanirbhāgavastu
3.6 bhāvābhāvasādhāraṇaṃ rūpam
3.7 aghaṭādiśabdanidarśanam
3.8 niyatarūpāvadhāraṇam
3.8.1 hetor asiddhatvam
3.8.2 evakārānarthakyam
3.8.3 hetor viruddhatvam
3.9 bāhyatvagrahaṇam
3.10 asaṃketitatvam
3.11 vyāvṛttiḥ
3.11.1 anyānanyavikalpaḥ
3.11.2 vṛttiḥ
3.11.3 vyāvṛtteḥ pramāṇam
3.11.3.1 pratyakṣam
3.11.3.2 anumānam
3.11.3.3 śabdaḥ
3.11.4 anyavyāvṛttir ekā vā nānā vā
3.11.5 sāṃvṛtarūpānyavyāvṛttiḥ
3.11.6 sāmānyaśabdaḥ
3.11.7 anubhavo 'nyāsaṃsargī
3.11.8 upasaṃhāraḥ
3.12 paryāyatvāpattiḥ
4 bauddhamatam
4.1 jātyabhāvaḥ

4.2 abhimānaḥ

4.3 apohaḥ śabdārthaḥ

4.4 vijātīyavyāvṛttena rūpeṇa svalakṣaṇaṃ śabdārthaḥ

4.5 anugatarūpanirāsaḥ

4.6 ubhayasiddham

4.7 śabdā avidyāsvabhāvāḥ

4.8 vastupratilambhaḥ

4.9 upasaṃhāraḥ

5 bauddhamatanirākaraṇam

5.1 jāter abhāvaḥ

5.2 abhimānaḥ

5.3 nāpoho vācyaḥ

5.4 na nivṛttiḥ sajātīyānugatā

5.5 jātisamarthanam

5.6 vikalpā nāvidyāmātram

5.7 vastupratilambhaḥ

5.8 ubhayasiddham

5.9 upasaṃhāraḥ

## Bibliography

*Apohaprakaraṇa* (by Dharmottara)

AP — See Frauwallner [1937].

*Apohaprakaraṇa* (by Jñānaśrīmitra)

See JNĀ.

*Apohasiddhi* (by Ratnakīrti)

See RNĀ.

*Kāśikā* (by Sucaritamiśra)

I&II — *Mīmāṃsāślokavārttikaṃ, Sucaritamiśrapraṇītayā Kāśikākhyayā Ṭīkayā sametam*. Ed. K. Sāmbaśiva Śāstrī. Part I (1926), Part II (1929). Trivandrum: University of Travancore. [Reprint: CBH Publications, 1990.]

III *Mīmāṃsāślokavārttikaṃ, Sucaritamiśrapraṇītayā Kāśikākhyayā Vyākhyayā sametam*. Part III. Ed. V.A. Rāmasvāmi Śāstrī. Trivandrum: University of Travancore, 1943.

*Jaiminisūtra*

*Mīmāṃsādarśanam Jaiminimīmāṃsāsūtrapāthaḥ*. Ed. Kevalānandasarasvatī. Wai: Prajñā Pāṭhaśālā Maṇḍala, 1948.

*Jñānaśrīmitranibandhāvali*

JNĀ *Jñānaśrīmitranibandhāvali*. Ed. Anantalal Thakur. Patna: Kashi Prasad Jayaswal Research Institute, 1987.

*Tattvasaṅgraha* (*pañjikā*)

*Tattvasangraha of Ācārya Shāntarakṣita with the Commentary Pañjikā of Shri Kamalashīla*. Ed. Dvārikadāsa Śāstrī. 2 vols. Varanasi: Baudha Bharati, 1981, 1982.

*Tātparyaṭīkā*

*Ślokavārttikavyākhyā Tātparyaṭīkā of Uṃveka Bhaṭṭa*. Ed. S.K. Rāmanātha Śāstrī. Rev. K. Kunjuni Raja & R. Thangaswamy. Madras: University of Madras, [2]1971.

*Dharmottarapradīpa*

*Paṇḍita Durveka Miśra's Dharmottarapradīpa [Being a Sub-commentary on Dharmottara's Nyāyabinduṭīkā, a Commentary on Dharmakīrti's Nyāyabindu]*. Ed. Dalsukhbhai Malvania. Patna: Kashiprasad Jayaswal Research Institute, 1971.

*Nyāyakaṇikā* (=NKaṇ)

Stern *Vidhivivekaḥ of Maṇḍanamiśra with Commentary, Nyāyakaṇikā, of Vācaspatimiśra, and Supercommentaries, Juṣadhvaṅkaraṇī and Svaditaṅkaraṇī, of Parameśvaraḥ, Critical and Annotated Edition: the Pūrvapakṣaḥ*. Ed. Elliot M. Stern. 3 parts. Dissertation submitted to the University of Pennsylvania, 1988.

Gosvāmī *Vidhiviveka of Śrī Maṇḍana Miśra with the Commentary Nyāyakaṇikā of Vācaspati Miśra*. Ed. Mahāprabhulāl Gosvāmī. Varanasi: Tara Printing Works, 1986.

*Nyāyakandalī*

*Nyāyakandalī*. Ed. J.S. Jetly and Vasant G. Parikh. Vadodara: Oriental

Institute, 1991.

*Nyayabhūṣaṇa*

*Śrīmadācāryabhāsarvajñapraṇītasya Nyāyasārasya Svopajñaṃ Vyākhyānaṃ Nyāyabhūṣaṇam*. Ed. Svāmī Yogīndrānanda. Varanasi: Ṣaḍdarśana Prakāśana Pratiṣṭhānam, 1968.

*Nyāyamañjarī*

*Nyāyamañjarī of Jayantabhaṭṭa with Ṭippaṇi — Nyāyasaurabha by the Editor*. Ed. K.S. Varadācārya. 2 vols. Mysore: Oriental Research Institute, 1969, 1983.

See also Kataoka's series of article editions for the *apoha* sections.

*Nyāyamañjarīgranthibhaṅga*

*Nyāyamañjarīgranthibhaṅga*. Ed. Nagin J. Shah. Ahmedabad: L.D. Institute of Indology, 1972.

*Nyāyaratnākara*

*Ślokavārttika of Śrī Kumārila Bhaṭṭa with the Commentary Nyāyaratnākara of Śrī Pārthasārathi Miśra*. Ed. Svāmī Dvārikādāsa Śāstrī. Varanasi: Tara Publications, 1978.

*Nyāyavārttikatātparyaṭīkā*

NVTṬ *Nyāyavārttikatātparyaṭīkā of Vācaspatimiśra*. Ed. Anantalal Thakur. New Delhi: Indian Council of Philosophical Research, 1996.

*Prakaraṇapañcikā*

*Prakaraṇa Pañcikā of Sri Śālikanātha Miśra with Nyāya-siddhi*. Ed. A. Subrahmaṇya Śāstrī. Varanasi: Banaras Hindu University, 1961.

Wai ms. A manuscript preserved in the Prajñā Pāthaśālā Maṇḍala, Wai. No. 6283. Paper. Devanāgarī. 56 folios. Complete.

*Pramāṇavārttika* (=PV)

I See PVSV.

III See Tosaki [1979][1985].

*Pramāṇavārttikālaṃkāra*

PVA *Pramāṇavārtikabhāshyam or Vārtikālaṅkāraḥ of Prajñākaragupta*. Ed. Rāhula Sāṅkṛityāyana. Patna: Kashi Prasad Jayaswal Research Institute, 1953.

*Pramāṇavārttika-svavṛtti*

PVSV　*The Pramāṇavārttikam of Dharmakīrti: the First Chapter with the Autocommentary*. Ed. Raniero Gnoli. Roma: Istituto Italiano per il Medio ed Estremo Oriente, 1960.

*Pramāṇavārttikasvavṛtti-ṭīkā*

PVSVṬ　*Ācārya-Dharmakīrteḥ Pramāṇavārttikam (Svārthānumāna-paricchedaḥ) Svopajñavṛttyā Karṇakagomi-viracitayā Taṭṭīkayā ca sahitam*. Ed. Rāhula Sāṅkṛtyāyana. Allahabad, 1943.

*Pramāṇaviniścaya*

*Dharmakīrti's Pramāṇaviniścaya, Chapters 1 and 2*. Ed. Ernst Steinkellner. Beijing–Vienna: China Tibetology Publishing House/ Austrian Academy of Sciences Press, 2007.

*Ratnakīrtinibandhāvalī*

RNĀ$_1$　*Ratnakīrtinibandhāvalī*. Ed. Anantalal Thakur. Patna: Kashi Prasad Jayaswal Research Institute, 1957.

RNĀ$_2$　*Ratnakīrtinibandhāvaliḥ*. Ed. Anantalal Thakur. Patna: Kashi Prasad Jayaswal Research Institute, 1975. (Second revised edition.)

*Vākyapadīya*

*Bhartṛharis Vākyapadīya*. Ed. Wilhelm Rau. Wiesbaden: Kommissionsverlag Franz Steiner GMBH, 1977.

*Vidhiviveka*

See the *Nyāyakaṇikā*.

*Śarkarikā*

*Ślokavārtikaṭīkā (Śarkarikā) of Bhaṭṭaputra-Jayamiśra*. Ed. C. Kunhan Raja. Madras: University of Madras, 1946.

*Śābarabhāṣya*

*Śrīmajjaiminipraṇītaṃ Mīmāṃsādarśanam*. Ed. Subbāśāstrī. 6 bhāgas. Poona: Ānandāśramamudraṇālaya, 1929–34.
See Frauwallner [1968] for 1.1.1–5.

*Ślokavārttika*

For the text of the *apoha* section of the *Mīmāṃsāślokavārttika* quoted in the apparatus, I prepared my own edition on the basis of the two published editions by C. Kunhan Raja (1946) and Dvārikadāsaśāstrī

(1978), Hattori's text (1973, 1975), and two manuscripts preserved in the British Library, San Ms I.O. 3739 (=No. 7976) and 1449b (=No. 2149). I also consulted a manuscript of Sucaritamiśra's *Kāśikā* preserved in the Adyar Library, No. 38.G.5-5, 63359, TR 66-5.

Acharya, Diwakar

2006 *Vācaspatimiśra's Tattvasamīkṣā. The Earliest Commentary on Maṇḍanamiśra's Brahmasiddhi*. Stuttgart: Franz Steiner Verlag.

Dezső, Csaba

2005 *Much Ado about Religion by Bhatta Jayanta*. New York University Press/ JJC Foundation.

Frauwallner, Erich

1937 "Beiträge zur Apohalehre. II. Dharmottara." *Wiener Zeitschrift für die Kunde des Südasiens*, 44, 233–287. (*Kleine Schriften*, edited by Gerhard Oberhammer and Ernst Steinkellner, Wiesbaden: Franz Steiner Verlag GMBH, 1982.)

1968 *Materialien zur ältesten Erkenntnislehre der Karmamīmāṃsā*. Wien: Hermann Bölaus Nachf.

Hattori, Masaaki（服部 正明）

1973 "Mīmāṃsāślokavārttika, Apohavāda-shō no Kenkyū (Jō)." *Kyoto Digaku Bungakubu Kenkyū Kiyō*, 14, 1–44.

1975 "Mīmāṃsāślokavārttika, Apohavāda-shō no Kenkyū (Ge)." *Kyoto Digaku Bungakubu Kenkyū Kiyō*, 15, 1–63.

2006 "The Apoha Theory as Referred to in the Nyāyamañjarī." *Acta Asiatica* (Bulletin of the Institute of Eastern Culture), 90, 55–70.

Ishida, Hisataka（石田 尚敬）

2008 "Discussion of the *bhāvābhāvasādhāraṇya*—Material for the Study of the *Apoha* Theory—." A paper presented at the XVth Congress of the International Association of Buddhist Studies, Atlanta.

2011 "On the Classification of *anyāpoha*." In: R*eligion and Logic in Buddhist Philosophical Analysis. Proceeding of the Fourth International Dharmakīrti Conference. Vienna, August 23–27, 2005*, edited by Helmut Krasser, Horst Lasic, Eli Franco, Birgit Kellner, Vienna: Verlag der Österreichischen Akademie der Wissenschaften, 197–210.

forthcoming　“Dharmottara cho Anyāpohaprakaraṇa no Bōtōge ni tsuite.” In: *Okuda Shōou Sensei Shōju Kinen Indogaku Bukkyō-gaku Ronshū*.

Jambūvijaya, Muni

1968　“Dharmasaṃgrahaṇivṛttimāṃ āvatā ek Avataraṇanuṃ ṭibeṭan Graṃthane ādhāre Mūlasthān.” *Shri Mahavir Jaina Vidyalaya Golden Jubilee Volume Part I*, 11–13.

Kataoka, Kei（片岡　啓）

2003　“Keiken to Naisei: Henjū-kankei no Haaku-hōhō o meguru Giron no Hensen.” *Nanto Bukkyō*, 83, 1–32.

2004　“Critical Edition of the *Āgamaprāmāṇya* Section of Bhaṭṭa Jayanta’s *Nyāyamañjarī*.” *The Memoirs of the Institute of Oriental Culture*, 146, 222(131)–178(175).

2008　“A Critical Edition of Bhaṭṭa Jayanta’s *Nyāyamañjarī*: The Section on Kumārila’s Refutation of the *Apoha* Theory.” *The Memoirs of the Institute of Oriental Culture*, 154, 212(1)–182(31).

2009　“A Critical Edition of Bhaṭṭa Jayanta’s *Nyāyamañjarī*: The Buddhist Refutation of Kumārila’s Criticism of Apoha.” *The Memoirs of the Institute of Oriental Culture*, 156, 498(1)–458(41).

2010a　“Mittsu no Apoha setsu. Dharmottara ni itaru Model no hensen.” (Theories of apoha by Dignāga, Dharmakīrti and Dharmottara.) *South Asian Classical Studies*, 5, 251–284.

2010b　“A Critical Edition of Bhaṭṭa Jayanta's *Nyāyamañjarī*: Jayanta's View on *Jāti* and *Apoha*.” *The Memoirs of Institute for Advanced Studies on Asia*, 158, 220(61)–168(113).

2011a　*Kumārila on Truth, Omniscience, and Killing*. 2 parts. Vienna: Verlag der Österreichischen Akademie der Wissenschaften.

2011b　“A Critical Edition of Bhaṭṭa Jayanta's *Nyāyamañjarī*: The Buddhist refutation of *jāti*.” *The Memoirs of Institute for Advanced Studies on Asia*, 160, 636(1)–594(43).

2012　“Apoha towa Nanika?” (What is apoha?) *Indo Ronrigaku Kenkyū*, 5, 109–134.

2013　“Dharmottara wa Apoha-ron de Nani o Hihan shitanoka?” (What did Dharmottara deny in his theory of apoha?) *South Asian Classical Studies*,

8, 51–73.

forthcoming1 "Dharmottara's Theory of *Apoha*." *Journal of Indological Studies*, 24.

forthcoming2 "Dharmottara's Notion of *āropita*: Superimposed or Fabricated?" Forthcoming in the proceedings of the Apoha Workshop, Vienna, 2012.

Lasic, Horst

2000a *Ratnakīrtis Vyāptinirṇaya*. Wien: Arbeitskreis für tibetische und buddhistische Studien Universität Wien.

2000b *Jñānaśrīmitras Vyāpticarcā*. Wien: Arbeitskreis für tibetische und buddhistische Studien Universität Wien.

Ōmae, Futoshi

1998 "Kumārila no Sphoṭa hihan: Ślokavārttika Sphoṭavāda shō no Wayaku." *Shimane Kenritsu Kokusai Tanki Daigaku Kiyō*, 5, 21–50.

Pind, Ole Holten

1991 "Dignāga on *śabdasāmānya* and *śabdaviśeṣa*." In: *Proceedings of the Second International Dharmakīrti Conference, Vienna, June 11–16, 1989*, edited by Ernst Steinkellner, 269–280.

Ruegg, David Seyfort

1993 *Le traité du Tathāgatagarbha de Bu Ston Rin Chen Grub*. Paris: École Française D'Extrême-Orient.

Śāstrī, A. Subrahmaṇya

1961 See *Bhūmikā to the Prakaraṇapañcikā*.

Sen, Prabhal Kumar

2011 "The Apoha Theory of Meaning: A Critical Account." In: *Apoha, Buddhist Nominalism and Human Cognition*, edited by Mark Siderits, Tom Tillemans and Arindam Chakrabarti, New York: Columbia University Press, 170–206.

Shida, Taisei

2013 On the Testimonies of the *śabda[nityatā]adhikaraṇa* Section of the *Ślokavārttikakāśikāṭīkā*. *Journal of Indian and Buddhist Studies*, 61-3, 1108(50)–1113(55).

Slaje, Walter

1986 "Untersuchungen zur Chronologie einiger Nyāya-Philosophen." *Studien zur Indologie und Iranistik*, 11-12, 245–278.

Steinkellner, Ernst

1976 “Der Einleitungsvers von Dharmottaras Apohaprakaraṇam.” *Wiener Zeitschrift für die Kunde Südasiens*, 20, 123–123.

Tosaki, Hiromasa（戸崎 宏正）

1979 *Bukkyō Ninshikiron no Kenkyū (Jō)*. Tokyo: Daitō Shuppansha.

1985 *Bukkyō Ninshikiron no Kenkyū (Ge)*. Tokyo: Daitō Shuppansha.

Yamakami, Shōdō（山上 證道）

1999 *Nyāya gakuha no Bukkyō hihan*. Kyoto: Heirakuji-shoten.

# काशिका

## सुचरितमिश्रकृता।

## अपोहवादः।

[1 संगतिः]

विन्ध्यवासिनो मतं निराकृत्येदानीं सौगतसमयसिद्धमपोहरूपं सामान्यमुपन्यस्य दूषयति— "अगोनिवृत्तिः" इति।

[2 **बौद्धमतोपन्यासः**]

एवं हि बौद्धा मन्यन्ते।

[2.1 **शब्दार्थविचारः**]

[2.1.1 **सामान्यनिरासः**]

न तावच्छाबलेयपरिदृष्टं किंचिद्रूपं बाहुलेये समस्ति, परस्परव्यावृत्तस्वभावत्वात् सर्वभावानामनुगतरूपासत्त्वात्, अनुवृत्तिव्यावृत्त्योर्विरोधाद् एकत्र सहासंभवात्, अन्यानन्यादिरूपानिरूपणाद् वृत्तिविकल्पादिनिरूपणासहत्वाच्च।

---

**3 अगोनिवृत्तिः** ] *Ślokavārttika apoha* 1
**10 अन्यानन्यादि॰** ] *Ślokavārttika ākṛti* 53: एकानेकत्वमेकस्य तथान्यानन्यता कथम्। तत् सामान्यं विशेषश्चेत्येवमादि च दुष्करम्॥

---

**2 ॰सिद्ध॰** ] $A_1G_1K_1$; ॰सिद्धान्त॰ $S_1$ **3 ॰पन्यस्य दूषयति** ] $A_1G_1K_1$; ॰पन्यस्यति $S_1$ **3 अगोनिवृत्तिः** ] $A_1G_1S_1$; अगोनिवृत्तिः सामान्यं वाच्यं यैः परिकल्पितम् गोत्ववस्त्वेव तैरुक्तमगोपोहगिरा स्फुटम् $K_1$ **3 इति** ] $A_1G_1S_1$; om. $K_1$ **8 न** ] $A_1G_1K_1$; ना $S_1$ **8 ॰च्छाबलेय॰** ] $A_1G_1S_1$; ॰च्छाबले॰ $K_1$ **8 समस्ति** ] $A_1G_1K_1$; स्ति $S_1$ **9 ॰सत्त्वात्** ] $A_1G_1S_1$; ॰संभवाद् $K_1$ **10 अन्यानन्यादिरूपानिरूपणात्** ] $S_1$; अन्यानन्यादिरूपानिरूपणा॰ $A_1G_1$; अन्यानन्यनिरूपणाद् $K_1$ **11 ॰विकल्पादिनिरूपणा॰** ] $A_1G_1$; ॰विकल्पा॰ $K_1S_1$

### [2.1.2 एकाकारविकल्पः]

स्वलक्षणविषयविशददर्शनप्रभवस्त्वेकाकारविकल्पः, तद्भावभावात्। तस्मिन् हि सति तत्पृष्ठभाविगोत्वादिविकल्पो जायते। अतो विकल्पाकारमात्रमेव सामान्यमिति प्राक् प्रपञ्चितमेव। न तु व्यावृत्तात्मनामनुगतं नाम किंचित्तात्त्विकं रूपम्।

### [2.1.3 स्वलक्षणं न शब्दार्थः]

नन्वेवमविषयाः शब्दा भवेयुः। ते हि न तावदेवं सति स्वलक्षणमालम्बन्ते, तस्याभिलापसंसर्गानर्हत्वात्। संकेतानुसारिणी हि शब्दादर्थावगतिः। न च सर्वदेशकालाद्यनुगतिविरहिणां स्वलक्षणानां संकेतायतनत्वम्।

### [2.1.4 अनुगतं किंचिन्नास्ति]

अनुगतं च पारमार्थिकं किंचिद्रूपमेषामनिष्टमेव, विचारासहत्वात्।

---

**4 प्राक् प्रपञ्चितमेव** ] *Kāśikā* ad *Ślokavārttika ākṛti* 53 (Adyar ms. No. 63359, p. 2594.1–5): इह तु समसमयभाविनिर्विकल्पकस्वलक्षणविषयविशददर्शनभावित्वात् तथावभासः, तदभावे तथानुपलम्भात्। कस्य तर्हि गौरिति बुद्धावाकारः प्रथते। न कस्यचित्, विकल्पाकार एवायमिति वदन्ति।

**9** Cf. *Nyāyakaṇikā* Stern 1382.12–13 (Gosvāmī 131.14): न च वस्तुसतः स्वलक्षणस्यानुगतिः संभविनी।

**12** Cf. *Nyāyakaṇikā* Stern 1382.13–14 (Gosvāmī 131.14–15): न च जात्यादयो वस्तुसन्तः संभवन्ति, विचारासहत्वात्।

---

**2 °विषय°** ] $A_1G_1S_1$; om. $K_1$ **2 °विशददर्शन°** ] $S_1$; °दर्शन° $A_1G_1K_1$ **3 तत्पृष्ठ°** ] $A_1G_1$; तत्पृ+ $K_1$; तत्पृष्ट° $S_1$ **4 °मात्रमेव** ] $K_1$; °मेव $A_1G_1S_1$ **5 व्यावृत्तात्म°** ] $K_1S_1$; व्यावृत्त्या वृत्तात्म° $A_1G_1$ **5 रूपम्** ] $A_1G_1K_1$; om. $S_1$ **7 सति** ] $A_1G_1S_1$; om. $K_1$ **9 °वगतिः** ] $A_1G_1$; °वगति+ $K_1$; °नुगतिः $S_1$ **9 सर्व°** ] $A_1G_1$; om. $K_1S_1$ **9 °विरहिणां** ] $K_1S_1$; °विरहितानां $A_1G_1$ **10 °तायतन°** ] $A_1G_1K_1$; °ताधीन° $S_1$ **12 पारमार्थिकं किंचिद्रू°** ] $A_1G_1K_1$; किंचित्पारमार्थिकं रू° $S_1$

### [2.1.5 तद्वतो ऽवाच्यत्वम्]

अत एव तद्वतो ऽप्यवाच्यत्वम्, असति तस्मिंस्तद्वतो ऽप्यसत्त्वात्।

### [2.1.6 उपसंहारः]

तदेवं वस्तुनः सतो ऽभिधातुमयोग्यत्वाद् योग्यस्य वस्तुनो ऽभावाद् अभिधेयाभावाद् दुःस्थिताः शब्दाः कथमर्थिनं क्वचित् प्रवर्तयिष्यन्ति निवर्तयिष्यन्ति वा।

### [2.1.7 बौद्धमतद्वयम्]

मैवम्। यो हि विकल्पानां विषयः स शब्दार्थः। के ऽमी विकल्पा नाम। येयं कल्पनेति प्रसिद्धा। का पुनरसौ। अभिलापसंसर्गयोग्यः प्रतिभास आकारो यस्याः प्रतीतेः सासौ। कस्तस्या विषयः। स्वा-

---

**2** Cf. *Nyāyakaṇikā* Stern 1382.14–1384.1 (Gosvāmī 131.15–16): अत एव तद्वन्तो ऽपि न तात्त्विकाः, तदभावे तद्वत्तानुपपत्तेः।

**8 यो हि ··· शब्दार्थः** ] Dharmottara's *Apohaprakaraṇa* 585(236).6–7: rnam par rtog pa rnams kyi yul gaṅ yin pa de sgra'i don yin no//

**9 अभिलापसंसर्गयोग्यः ··· सासौ** ] Cf. *Nyāyakaṇikā* Stern 1382.8–9 (Gosvāmī 131.11–12): अभिलापसंसर्गाय योग्यः प्रतिभास आकारो यस्याः प्रतीतेः सा कल्पना।; *Pramāṇaviniścaya* ad I 4bc (Steinkellner 7.7): अभिलापसंसर्गयोग्यप्रतिभासा प्रतीतिः कल्पना।

---

**2 तद्वतो ऽप्यवा॰** ] $A_1G_1K_1$ ; **तद्वतामप्यवा॰** $S_1$ **2 ॰द्वतो ऽप्यस॰** ] $A_1G_1K_1$ ; **॰द्वतामप्यस॰** $S_1$ **4 वस्तुनः सतो** ] $A_1G_1$ ; **वस्तुसनस्सतो** $K_1$ ; **वस्तुसतो** $S_1$ **5 अभिधेयाभावाद् दुः॰** ] $A_1G_1$ ; **अभिधेयदुः॰** $K_1$ ; **अभिधेये दुः॰** $S_1$ **5 कथमर्थिनं क्वचित्** ] $A_1G_1K_1$ ; **कथं क्वचिदर्थिनं** $S_1$ **8 मैवम्** ] $K_1S_1$ ; **नैवम्** $A_1G_1$ **8 के ऽमी** ] $A_1G_1S_1$ ; **के पुनरमी** $K_1$ **9 कल्पनेति** ] $A_1G_1K_1$ ; **विकल्पनेति** $S_1$ **9 प्रसिद्धा** ] $A_1G_1K_1$ ; om. $S_1$ **9 ॰योग्यः** ] $A_1G_1$ ; **॰योग्य॰** $K_1S_1$

कार एवेत्येके। कल्पितं निस्तत्त्वमलीकमित्यन्ये।

### [2.2 ज्ञानाकारपक्षदूषणम्]

### [2.2.1 ज्ञानाकारो नाभिलापसंसर्गयोग्यः]

कथं पुनर्ज्ञानाकारो ऽभिलापसंसर्गयोग्यः। स हि विकल्पज्ञानाद-

---

**1 स्वाकार एवेत्येके** ] Cf. *Nyāyamañjarī* II 26.5–8, Kataoka [2009:464(35).4–7]: **अथवा विकल्पप्रतिबिम्बकं ज्ञानाकारमात्रकमेव तदबाह्यमपि विचित्रवासनाभेदोपाहितरूपभेदं बाह्यवदवभासमानं लोकयात्रां विभर्ति। व्यावृत्तिच्छायायोगाच्च तदपोह इति व्यवह्रियते। सेयमात्मख्यातिगर्भा सरणिः।**; *Nyāyakaṇikā* Stern 1384.1–3 (Gosvāmī 131.16–17): **तस्मात्स्वाभासं वालीकं वा बाह्यं पश्यति यादृशमेको गोविकल्पस्तादृशमेव गोविकल्पान्तरमपि।**; *Nyāyakaṇikā* Stern 1390.9–11 (Gosvāmī 132.17–18): **ज्ञानातिरिक्तस्य वेदनानुपपत्तेरन्यव्यावृत्तिरूपं सामान्यं ज्ञानाकार इति निरूपितं साकारवादिभिः।**

**1 कल्पितं निस्तत्त्वमलीकमित्यन्ये** ] Cf. The opening verse of Dharmottara's *Apohaprakaraṇa*, which is quoted in *Nyāyamañjarīgranthibhaṅga* 132.25–28 and corrected by Ishida [2008:5] [forthcoming] as follows (cf. also Steinkellner [1976] and Hattori [2006]): **बुद्ध्या कल्पिकया विविक्तमपरैर्यद्रूपमुल्लिख्यते बुद्धिर्नो न बहिर्यदेव च वदन्निस्तत्त्वमारोपितम्। यस्तत्त्वं जगतो जगाद विजयी निःशेषदोषद्विषां** (**°द्विषां** ] Ishida [forthcoming]; **°द्विषं** Ishida [2008]) **वक्तारं तमिह प्रणम्य शिरसापोहः स विस्तार्यते॥**; *Nyāyamañjarī* II 26.1–3, Kataoka [2009:465(34).10–464(35).1]: **सो ऽयं नान्तरो न बाह्यः, अन्य एव कश्चिदारोपित आकारः। व्यावृत्तिच्छायायोगादपोहः** (**°पोहः** ] $K_1$; **°पोह°** ed.) **शब्दार्थ उच्यते— इतीयमसत्ख्यातिवादगर्भा सरणिः।**; *Nyāyakaṇikā* Stern 1392.9 (Gosvāmī 132.23): **सम्प्रति निराकारज्ञानवादिनाम्**; *Nyāyavārttikatātparyaṭīkā* 441.21–442.3: **तस्मादेष विकल्पविषयो न ज्ञानं न ज्ञानाकारो नापि बाह्य इत्यलीक एवास्थेयः। यथाह भदन्तधर्मोत्तरः— बुद्ध्या कल्पिकया विविक्तमपरैर्यद्रूपमुल्लिख्यते बुद्धिर्नो न बहिः—इति।**

**4 कथं ··· शब्दानाम्** ] *Kāśikā* ad *abhāva* 8 (III 196.5–8): **शब्दसंस्पृष्टं हि रूपं विकल्पस्य विषयः, न चेह तदस्ति। न चात्मा विकल्पस्याभिलापसंसर्गयोग्यः, असाधारणत्वात्। अत एवात्मनि निर्विकल्पकत्वात् कल्पनास्वसंवित्तिं प्रत्यक्षमा-**

---

**4 विकल्प°** ] $A_1G_1K_1$; **सविकल्प°** $S_1$

नन्यस्तद्वदेव क्षणिको ऽसाधारण इति सुखादिस्वसंवित्तिवदविषयः शब्दानाम्। यथाहुः—

अशक्यसमयो ह्यात्मा सुखादीनामनन्यभाक्।
तेषामतः स्वसंवित्तिर्नाभिजल्पानुषङ्गिणी॥ इति।

[2.2.2 कल्पना स्वसंवित्तावविकल्पिका]

अपि चेयं कल्पना स्वसंवित्तौ प्रत्यक्षमिष्टा। सा कथमात्मन्यविकल्पिका भूत्वा स्वतो ऽभिन्ने स्वाकारे विकल्पवती भविष्यति। निराकृतं चेदमाचार्येण स्वयमेव विकल्पाकारस्य शब्दवाच्यत्वम्—

ज्ञानादव्यतिरिक्तं च कथमर्थान्तरं व्रजेत्॥ इति।

[2.2.3 ज्ञानाकारस्य बाह्यत्वम्]

स्यादेतत्। आन्तरो विकल्पाकारो बाह्यत्वेनावसीयते। तद्यदस्य

---

ह (प्रत्यक्षमाह] em.; प्रत्यक्षामाह ed.)। यदाह "नैनमियमभिलापेन संसृजति। तथावृत्तेरात्मनि विरोधात्" (*Pramāṇaviniścaya* ad I 21ab) इति।; Cf. *Tattvasaṅgraha* 884: बुद्ध्याकारश्च बुद्धिस्थो नार्थबुद्ध्यन्तरानुगः। नाभिप्रेतार्थकारी च सो ऽपि वाच्यो न तत्त्वतः॥

**3 अशक्यसमयो ⋯ °नुषङ्गिनी**] *Pramāṇavārttika* III 249 = *Pramāṇaviniścaya* I 21, also quoted in *Nyāyakaṇikā* Stern 1412.12–13 (Gosvāmī 135.17–18).

**9 ज्ञाना° ⋯ व्रजेत्**] *Pramāṇavārttika* I 71cd, also quoted in Dharmottara's *Apohaprakaraṇa* 590(241).8–9 and Jñānaśrīmitra's *Apohaprakaraṇa* 220.11; cf. also *Tattvasaṅgraha* 1024cd: बुद्धेरनन्यरूपं हि यायादर्थान्तरं कथम्॥

**11 आन्तरो ⋯ इत्युच्यत इति**] Cf. *Nyāyavārttikatātparyaṭīkā* 441.8–10: स्वाकारमबाह्यं बाह्यमध्यवस्यन् विकल्पः स्वाकारबाह्यत्वविषय इति चेत्। य-

---

**1 °संवित्तिवदविष°**] $G_1^{pc}K_1S_1$; °संवित्तिविदविष° $A_1$; °संवित्तिवदवि° $G_1^{ac}$ **4 °जल्पानुषङ्गिणी**] $A_1G_1K_1$; °लापानुसङ्गिणी $S_1$ **4 इति**] $A_1G_1$; + $K_1$; om. $S_1$ **7 स्वतो ऽभिन्ने स्वाकारे**] $K_1$; स्वतोदभिन्ने स्वाकारे $A_1G_1$; स्वतो भिन्नाकारे $S_1$ **7 भविष्यति**] $A_1G_1K_1$; भविष्यतीति $S_1$ **8 चेदमा°**] $A_1G_1$; चैतदा° $K_1$; हीदमा° $S_1$ **8 °चार्येण**] $A_1G_1K_1$; °चार्यैः $S_1$ **8 विकल्पा°**] $A_1G_1K_1$; सविकल्पा° $S_1$ **11 आन्तरो**] $A_1G_1K_1$; आन्तरो ऽपि $S_1$ **11 °नावसीयते**] $A_1G_1K_1$; °नाध्यवसीयते $S_1$

बाह्यत्वं तच्छब्दसंस्पृष्टम्। अतस्तद्वारेण विकल्पप्रतिभासो ऽपि शब्दसंस्पृष्ट इत्युच्यत इति।

तन्न, तस्यापि प्रतिभासादनन्यस्य तद्वदेवासाधारणस्याशब्दविषयत्वात्।

### [2.2.4 ज्ञानाकारस्यावाच्यत्वम्]

अतः स्वात्मन्यविकल्पको विकल्पस्तदभिन्नयोः स्वप्रतिभासबाह्यत्वयोरप्यविकल्पक एवेति सांप्रतम्।

यत्तु स्वात्मा विकल्पस्यानुभूयते, ग्राह्याकारस्तद्बाह्यत्वं च शब्दसंस्पृष्टतया विकल्प्यत इति, नैतदभेदे घटते। न ह्यनुभूयमानेनाननुभूयमानमभिन्नं भवति। अतो ऽवश्यं विकल्पतत्प्रतिभासबाह्यत्वेभ्यो ऽन्य एव शब्दानां विषयो वक्तव्यः।

### [2.3 अलीकशब्दार्थपक्षः]

अस्तु तर्हि कल्पितमलीकं शब्दार्थः। अस्तु तावत्, कथं तदन्य-

---

थाह—स्वप्रतिभासे ऽनर्थे ऽध्यवसायेन प्रवृत्तिरिति।; *Pramāṇaviniścaya* 46.7–8: स्वप्रतिभासे ऽनर्थे ऽर्थाध्यवसायेन प्रवर्तनाद् भ्रान्तिरप्यर्थसंबन्धेन तदव्यभिचारात्प्रमाणम्।; the *Pramāṇaviniścaya* passage *स्वप्रतिभासे ऽनर्थे ऽर्थाध्यवसायेन प्रवर्तनात् is quoted in Dharmottara's *Apohaprakaraṇa* 587(238).22–23.

**13 कथं … न त्वपोहरूपः** ] Cf. *Nyāyamañjarī* II 23.18–19, Kataoka [2009:470(29).9–469(30).1]: नन्वेवमारोपिताकारविषया एव विकल्पा उक्ता भवन्ति। व्यावृत्तिविषयत्ववाचोयुक्तिरनन्वितेत्युक्तम्।; Dharmottara's *Apoha-*

---

**1 बाह्यत्वं** ] $A_1G_1K_1$; **बाह्यस्य** $S_1$ **1 अतस्तद्वारेण** ] $G_1S_1$; **अतस्ताद्वारेण** $A_1$; **तद्वारेण** $K_1$ **2 शब्दसंस्पृष्ट** ] em.; **शब्दसंसृष्ट** $A_1G_1K_1S_1$ **2 इत्युच्यत** ] $A_1G_1K_1$; **उच्यत** $S_1$ **6 विकल्पस्त°** ] $K_1S_1$; **विकल्पकस्त°** $A_1G_1$ **7 °बाह्यत्वयोरप्यविकल्पक** ] $A_1G_1K_1$; **°बाह्ययोरपि विकल्प** $S_1$ **8 स्वात्मा** ] $A_1G_1K_1$; **स्वात्मनि** $S_1$ **9 °संस्पृष्टतया** ] $K_1$; **°संसृष्टतया** $A_1G_1S_1$ **9 इति** ] $A_1G_1K_1$; **इति विकल्पितं** $S_1$ **10 °नेनाननुभू°** ] $A_1G_1$; **°नेनानुभू°** $K_1$(marked); **°नेननुभू°** $S_1$ **10 भवति** ] $A_1G_1$; **संभवति** $K_1S_1$ **13 °त्, कथं** ] $A_1G_1K_1$; **°त्कथं तु** $S_1$

निवृत्तिरूपम्। एवं हि प्रतिभासानुगुणतया विधिरूप एव शब्दार्थः कल्पितो भवेत्, न त्वपोहरूपः। एकविधिनान्तरीयको ह्यन्यापोहः, न प्रतीतिकृतः।

[2.3.1 दृष्टसदृशसमारोपस्यानुपपन्नत्वम्]

मैवम्। भावाभावसाधारणो ह्यर्थः शब्दादवगम्यते। यदि च यादृशो बहिर्दहनादिरर्थक्रियासमर्थो दृष्टः, तादृश एव विकल्पैरारोप्यते।

एवं तर्हि वृक्ष इत्युक्ते सदसत्त्वे प्रत्यपेक्षा न स्यात्, तद्वच-

---

*prakaraṇa* 590(241).11–15: gal te rnam par rtog pas sgro btags kyi raṅ bźin ṅes par byas pas de ñid sgra'i don yin na sgrub pa'i raṅ bźin sgra's don yin mod de ṅes na yaṅ me ñid chu ma yin pa'i phyir gźan ldog pa ni gcig sgrub pa'i śugs kyis ṅes pa yin gyi/ gźan las ldog pa rtogs par byas pa ni ma yin no//

**2 एकविधि° ··· ह्यन्यापोहः** ] Dharmottara's *Apohaprakaraṇa* 590(241).15–16: gcig ṅes par ma byas pa ni gźan las ldog pa rtogs par mi 'thad pa'i phyir ro//

**7 एवं तर्हि ··· °सत्त्वविरोधात्** ] Dharmottara's *Apohaprakaraṇa* 590(241).18–25: 'di la gal te phyi rol sreg pa'i don byed par bzod pa mthoṅ ba ci 'dra ba de 'dra ba kho nar rnam par rtog pas phyi rol gyi me ñid du sgro btags pa snaṅ bar byed na ni phyi rol bźin du ṅes par 'gyur gyi yod dam med ces dṅos po daṅ dṅos po med pa'i rnam rtog gźan ñe ba la mi ltos śiṅ de dag daṅ 'brel par yaṅ mi 'gyur ro// gaṅ gi phyir phyi rol gyi me ni dṅos po yod pa la mi ltos te/ mthoṅ ba ñid kyi raṅ bźin ni yod pa'i dṅos po'i bdag ñid du yod pa'i phyir ro// dṅos po med pa la yaṅ mi ltos te/ mthoṅ ba de'i raṅ bźin ni med pa daṅ 'gal ba'i phyir ro//; see also Frauwallner [1937:262, n.2].

---

**2 शब्दार्थः कल्पितो** ] $A_1G_1$; **कल्पितः शब्दार्थो** $K_1S_1$ **2 ह्यन्या°** ] $A_1G_1K_1$; **न्या°** $S_1$ **6 बहिर्दहनादिर°** ] $A_1G_1^{pc}K_1$; **बहिहर्दहनादिर°** $G_1^{ac}$; **वह्निर्दहना-द्य°** $S_1$

नशब्दसमभिव्याहारश्च यथा—अस्ति वृक्षो न वा—इति। न हि बाह्ये दृश्यमाने सद्भावापेक्षा भवति, दृष्टस्वभावस्यैव सद्भावात्मकत्वात्। नाप्यभावापेक्षा, दृष्टस्वरूपस्यासत्त्वविरोधात्। एवमेव दृष्टसदृशः समारोपितो ऽपि भावाव्यभिचाराद् अभावविरोधाच्च “अस्ति” “नास्ति” इति नापेक्ष्येत। न च ताभ्यां संबध्येत। अतो विधिप्रतिषेधसाधारण उभयसंबन्धयोग्यो विकल्पैरर्थो ऽवसीयत इत्यनुभवायत्तमेतत्।

[2.3.2 बाह्यविधर्मारोपः]

एवं चोभयसाधारणो बाह्यविधर्मारोपितो विकल्पैरित्याश्रयणीयम्। दृष्टसदृशे ह्यारोप्यमाणे विधिरूपः शब्दार्थो भवेत्, दर्शनेन भावरूपविधानात्। अतो विधिरूपं स्प्रष्टुं तत्सदृशं चारोपयितुमसमर्थो विकल्पो ऽवृक्षाभावनिष्ठं वृक्षमारोपयति। शब्दो ऽपि तत्समानविषयस्तथाविधमेवाभिनिविशते। एवं चावृक्षनिवृत्तिमात्रपर्यवसायिनि शब्दे भावाभावयोरुदासीने वृक्ष इत्युक्ते युक्तैव भावाभावौ प्रत्यपेक्षा तद्वचनसंबन्धश्च।

---

**1 न हि ··· ०विरोधात्** ] Cf. *Nyāyamañjarī* II 25.6–7, Kataoka [2009:467(32).8–9]: बाह्यस्य हि वस्तुनः स्वरूपेणावगतस्य न विकल्पान्तरोपनीतभावसंबन्ध उपपद्यते, वैयर्थ्यात्। नाप्यभावसंबन्धः, विप्रतिषेधात्।

---

**1 तद्वचनशब्द०** ] $K_1S_1$ ; **तद्वचनश्शब्दस्** $A_1G_1$ **1 ०रश्च यथा—अस्ति** ] $A_1G_1S_1$ ; **०रश्चास्ति** $K_1$ **1 वृक्षो** ] $A_1G_1K_1$ ; om. $S_1$ **1 न हि** ] $A_1G_1S_1$ ; **न** $K_1$ **2 ०स्वभाव०** ] $K_1S_1$ ; **०स्य भाव०** $A_1G_1$ **3 ०स्वरूप०** ] $A_1G_1K_1$ ; **०रूप०** $S_1$ **4 ०सदृशः** ] $A_1G_1S_1$ ; **०सदृशत्वस्य** $K_1$ **4 समारोपितो** ] $A_1G_1S_1$ ; **समारोपितस्य** $K_1$ **4 ऽपि भावा०** ] $S_1$ ; **विभावा०** $A_1G_1$ ; **भावा०** $K_1$ **4 ०व्यभिचाराद्** ] $A_1G_1S_1$ ; **०व्यतिरेकाद्** $K_1$ **7 ०वायत्त०** ] $A_1G_1K_1$ ; **०वायात०** $S_1$ **10 ह्यारो०** ] $A_1G_1$ ; **चारो०** $K_1S_1$ **10 दर्शनेन** ] $A_1G_1K_1$ ; **तद्दर्शनेन** $S_1$ **11 स्प्रष्टुं** ] $A_1G_1K_1$ ; **दृष्टं** $S_1$ **13 एवं चा०** ] $A_1G_1S_1$ ; **एवम०** $K_1$ **15 तद्वचन०** ] $A_1G_1K_1$ ; **तद्वचनशब्द०** $S_1$

[2.3.3 सादृश्यसमर्थनम्]

नन्वेवं बाह्यविधर्मणो बहिरसतः कथम् "वृक्षो ऽयम्" इति बहिरवभासः। बाह्यसादृश्यात्।

[2.3.3.1 अतत्कारिव्यावृत्तिः]

किं पुनरत्यन्तासतो ऽलीकस्य परमार्थसता बाह्येन सादृश्यम्। अतत्कारिव्यावृत्तिः। वृक्षो हि बहिरवस्थितो ऽतत्कारिभ्यो व्यावृत्तः, तथाविधं च रूपमारोपितम्—इत्येकान्तविसदृशयोरपि बाह्येतरयोरन्यव्यावृत्त्या युक्तमेव सादृश्यम्। अतश्च बाह्याध्यवसायः।

[2.3.3.2 दर्शनमेव कार्यम्]

के पुनरमी तत्कारिणः। न ह्येकजातीयाः केचित्संभवन्ति, जातेरभावात्। अत एव कार्याणामप्येकता न संभवति। प्राक् कार्यदर्शनाददृष्टपूर्ववस्तुदर्शने कथं तत्कारित्वाध्यवसायः। तदनवधारणे च कथमतत्कारिव्यावृत्तं रूपं विकल्पैरारोपितमभिनिविशन्ते शब्दाः।

अत्राहुः—किमत्र कार्यान्तरेण। दर्शनमेव हि कार्यं दृश्यानां व्यक्तीनाम्। तच्चादृष्टपूर्ववस्तुदर्शने ऽपि जायमानं दृश्यत एवेति। तदेक-

---

**11 प्राक् ··· ०ध्यवसायः** ] Dharmottara's *Apohaprakaraṇa* 596(247).13–15: sṅar ma mthoṅ ba'i dṅos po la go mthoṅ ba'i de ma thag pa'i źen pas mthoṅ ba'i raṅ bźin dṅos po gźan las ldog par 'dzin pa ci 'dra ba źig yin/

---

**8 ०रन्य०** ] $A_1G_1K_1$ ; **०रवृक्ष०** $S_1$ **8 अतश्च** ] $A_1G_1K_1$ ; **ततश्च** $S_1$ **10 पुनरमी** ] $A_1G_1K_1$ ; **पुनरमी ये** $S_1$ **10 केचित्सं०** ] $A_1G_1K_1$ ; **केचित् तत्कारिणः सं०** $S_1$ **11 ०प्येकता** ] $A_1G_1K_1$ ; **०प्येकत्वं** $S_1$ **12 ०ददृष्ट०** ] $K_1S_1$ ; **०दृष्ट०** $A_1G_1$ **12 ०दर्शने** ] $A_1G_1K_1$ ; **०दर्शने पि** $S_1$ **12 तदनवधारणे** ] $A_1G_1S_1$ ; **तदवधारणे** $K_1$ **13 ०मतत्कारि०** ] $A_1G_1$ ; ++**कारि** $K_1$ ; **०मतद्०** $S_1$ **13 ०रारोपितम०** ] $A_1G_1$ ; **०रारोपयितुम०** $K_1S_1$ **14 अत्राहुः** ] $A_1G_1$ ; **अत्राह** $K_1$ ; **तत्राहुः** $S_1$ **14 कार्यान्तरेण** ] $A_1G_1S_1$ ; **कार्यदर्शनान्तरेण** $K_1$ **15 व्यक्तीनाम्** ] $A_1G_1K_1$ ; om. $S_1$ **15 ऽपि** ] $A_1G_1K_1$ ; om. $S_1$ **15 एवेति** ] $A_1G_1K_1$ ; **एव** $S_1$

कार्याभ्यश्च व्यक्तिभ्यो ऽन्या अतत्कारिणीः पराणुद्य गवादिशब्दार्था व्यवस्थाप्यन्ते।

[2.3.3.3 एकप्रत्यवमर्शहेतुत्वम्]

ननु दर्शनान्यपि यावद्दृश्यं भिद्यमानानि कथमेकं कार्यम्। न, एकप्रत्यवमर्शहेतुत्वेन तेषामभेदात्। भवति हि गां दृष्टवतो गौरिति पूर्वापरयोरेको ऽवमर्शः। तदेकत्वाच्च तत्कारिणां दर्शनानामभेदः। तदभेदाच्च दृश्यानां व्यक्तीनाम्। यथाहुः—

एकप्रत्यवमर्शस्य हेतुत्वाद्धीरभेदिनी।
एकधीहेतुभावेन व्यक्तीनामप्यभिन्नता॥ इति।

[2.3.3.4 उपसंहारः]

अतः समारोपितातत्कारिव्यावृत्त्यभिनिवेशिनो विकल्पाः शब्दाश्चेति न नोपपन्नम्। तदिदमुक्तम्—

---

**4 ननु ··· कार्यम्** ] Dharmottara's *Apohaprakaraṇa* 596(247).22–23: gal te dṅos po bźin du mthoṅ ba yaṅ tha dad pa ma yin nam/

**5 एकप्रत्यवमर्शहेतुत्वेन ··· दृश्यानां व्यक्तीनाम्** ] Dharmottara's *Apohaprakaraṇa* 596(247).27–31: bye brag rnams so sor tha dad pa la mthoṅ ba tha dad pa yin no// mthoṅ ba'i de ma thag tu 'byuṅ ba'i ṅes par byed pas ni tha dad pa med par źen par byed do// de'i phyir mthoṅ ba gcig byed pa'i gsal ba rnams 'bras bu de mi byed pa dag las ldog pa raṅ bźin mtshuṅs par rtogs par byed do/

**8 एकप्रत्यवमर्शस्य ··· °भिन्नता** ] *Pramāṇavārttika* I 109, also quoted in *Nyāyamañjarī* II 12.1–2 (Kataoka [2011b:599(38).9–10]), and in *Nyāyakaṇikā* Stern 1384.8–9 (Gosvāmī 131.22–23).

---

**1 °कार्याभ्यश्च** ] $A_1G_1S_1$; °कार्याभ्यो $K_1$ **1 व्यक्तिभ्यो ऽन्या अतत्कारिणीः** ] $A_1G_1$; व्यक्तिभ्यश्चान्या अतत्कारिणीः $K_1$; व्यक्तिभ्यो ऽन्यातत्कारिणी $S_1$ **1 पराणुद्य** ] $G_1^{pc}K_1$; पराणुन्य $A_1G_1^{ac}$; परानुद्य $S_1$ **4 दर्शनान्यपि** ] $A_1G_1S_1$; दर्शनानि $K_1$ **7 तदभेदाच्च** ] $A_1G_1K_1$; तदभेदाद् $S_1$ **11 °वृत्त्य°** ] $A_1G_1$; °वृत्तिरूपा° $K_1S_1$

तस्यां यद्रूपमाभाति बाह्यमेकमिवान्यतः।
व्यावृत्तमिव निस्तत्त्वं परीक्षानङ्गभावतः॥

इति।

[2.3.3.5 ज्ञानाकारवादिनामपि साधारणः श्लोकः]

एष च ज्ञानाकारवादिनामपि साधारणः श्लोकः। तेषामप्येवमेवान्यापोहवचनत्वं शब्दानाम्।

[2.4 अन्यव्यावृत्तिनिष्ठत्वम्]

[2.4.1 भावाभावसाधारणरूपावसानम्]

भवति चात्र—यद्भावाभावसाधारणं रूपमवसीयते, तदन्यव्यावृ-

---

**1 तस्यां** ··· **°भावतः** ] *Pramāṇavārttika* I 77, also quoted in *Nyāyakaṇikā* Stern 1394.5–6 (Gosvāmī 132.28–29).

**9 यद्भावाभाव°** ··· **°रूपाभिनिवेशिनः** ] Dharmottara's *Apohaprakaraṇa* 593(244).10–16: gaṅ źig dṅos po daṅ dṅos po med pa thun moṅ du źen pas ṅes par 'dzin pa de ni gcig las ldog pa ṅes pa lhur byed pa yin te/ dper na bum pa ma yin par śes pas bum pa ma yin par ṅes par 'dzin pa na yod dam med ces dṅos po daṅ dṅos po med pa thun moṅ du ṅes par 'dzin par byed pa bźin no// rnam par rtog pa thams cad kyis kyaṅ dṅos po daṅ dṅos po med pa dag gi raṅ bźin thun moṅ du ṅes par 'dzin par byed do//; see also Ishida [2008:7–8]; cf. also *Nyāyakaṇikā* Stern 1386.3–7 (Gosvāmī 131.25–27): यद्भावाभावसाधारणं रूपं तदन्यव्यावृत्तिनिष्ठमेव यथा मूर्तत्वादि। तथा च गवादि विकल्पविषय इति स्वभावहेतुः। साधारणं खल्वेतद् गोत्वादि भावाभावयोः, अस्ति गौर्नास्ति गौरिति विकल्पास्पदत्वात्।; *Nyāyavārttikatātparyaṭīkā* 442.16–18: यद् भावाभावसाधारणं तदन्यव्यावृत्तिरूपमेव (°रूपमेव ] em.; °रूपयेव ed.), यथामूर्तत्वम्। तत् खलु विज्ञाने च शशविषाणे च साधारणम्। तथा च विवादाध्यासिता विकल्पविषया घटपटादय इति स्वभावहेतुः।

---

**2 °नङ्गभावतः** ] $K_1S_1$; न गभावत $A_1G_1$ **5 साधारणः** ] $A_1G_1S_1$; साधारण° $K_1$ **9 °साधारणं** ] $K_1S_1$; °साधारणं ग्रहणे $A_1G_1$

त्तिनिष्ठम्। यथाघटावसायेन पटो ऽवसीयमानः स ह्यस्ति न वेति भावाभावसाधारणो ऽवसीयते, अन्यनिवृत्तिनिष्ठश्च। तथा च सर्वे शब्दा भावाभावसाधारणरूपाभिनिवेशिनः—इत्यनुभवसिद्धम्।

### [2.4.2 नञ्योगिशब्दनिदर्शनेन साधनम्]

अपि च नञ्योगिनां तावदविवादमावयोरन्यापोहवचनत्वम्। इतरेषां तु वस्तुवचनत्वमस्माकमसिद्धम्—इत्युभयसिद्धान्यनिवृत्तिवचनत्वं नञ्योगिनिदर्शनेनोक्तादेव हेतोः शब्दत्वाद्वा शक्यमन्येषामपि विमतिपदास्पदानां तथात्वमापादयितुम्।

### [2.4.3 अत्यन्तविसदृशस्य बाह्यत्वग्रहणम्]

अपि चात्यन्तविसदृशं बाह्येन रूपमादर्शयन्तो विकल्पाः कथमिव बाह्यमादर्शयन्ति, न यदि व्यावृत्तिनिष्ठा भवन्ति। यत्किलात्यन्तवि-

**11 यत्किलात्यन्त° ··· बाह्यो ऽवधार्यते** ] Dharmottara's *Apohaprakaraṇa* 593(244).29–594(245).4: gaṅ źig śin tu mi 'dra ba de'i raṅ bźin du 'dzin pa de ni gźan las bzlog pas byas pa'i 'dra bar 'dzin pa lhur len pa yin te/ dper na snam bu bum pa daṅ śin tu mi 'dra yaṅ śiṅ ma yin par khyad par can du ṅes par rtogs pa na 'di yaṅ śiṅ ma yin na 'di yaṅ śiṅ ma yin źes yin na bum pa daṅ 'dra bar ṅes par rtogs pa bźin no// de bźin du rnam par rtog pa'i don phyi rol daṅ śin tu mi mthun pa yaṅ phyi rol tu ṅes par rtogs pa yin no//; *Pramāṇavārttikasvavṛttiṭīkā* 112.18–22: एतेन यदुच्यते—यद् बाह्यात्यन्तविसदृशस्य स्वाकारस्य तादृप्यग्रहणं तद् अन्यनिवृत्तिकृतसादृश्यपरम्। यथा घटविसदृशो ऽपि पटो वृक्षाभावविशिष्टो ऽवधार्यमाणः "अयमप्यवृक्षः" इ-

**1 °व्यावृत्ति°** ] $A_1G_1K_1$; °वृत्ति° $S_1$ **1 °न पटो** ] $A_1G_1K_1$; °नाघटो $S_1$ **2 भावाभावसाधारणो** ] $A_1G_1K_1$; साधारणो $S_1$ **2 तथा** ] $A_1G_1K_1$; तथ $S_1$ **5 नञ्योगिनां** ] $A_1G_1S_1$; नञ्योगिनि दर्शनेनोक्तादेव हेतो $K_1$(eyeskip) **6 °मस्माकमसिद्धम्** ] $A_1G_1K_1$; °मित्युभयस्यासिद्धम् $S_1$ **7 °वचनत्वं** ] $S_1$; °वचनं $A_1G_1$; °वचन° $K_1$ **8 विमतिपदास्पदा°** ] $G_1^{pc}K_1S_1$; पदास्पदा° $A_1$; विमतिपदास्सदा° $G_1^{ac}$ **10 चात्यन्त°** ] $A_1K_1$; चाटान्त° $G_1$; चासत्यमत्यन्त° $S_1$ **11 यत्कि°** ] $A_1G_1K_1$; यदि कि° $S_1$

सदृशानां ताद्रूप्यग्रहणं तदन्यव्यावृत्तिपरम्। यथा घटपटयोरेकान्तविसदृशयोरप्यवृक्षो ऽयमयं चेति ताद्रूप्येणावधारणमन्यनिवृत्तिकृतमेव। तथा च विकल्पविषयो ऽर्थो ऽत्यन्तासन्नत्यन्तबाह्यविसदृशो बाह्यो ऽवधार्यते—इत्यनुभवसिद्धमेव।

[2.4.4 नियतरूपावधारणम्]

अपि च नियतरूपावधारणमन्यनिवृत्तिविषयं दृष्टम्। यथा घट ए-

---

ति घटसदृशो ऽवधार्यते, वृक्षव्यावृत्तेर्घटपटयोस्तुल्यत्वात्। तथा विकल्पविषयो ऽत्यन्तं बाह्यविसदृशो (बाह्यविसदृशो ] ms.; वामे विसदृशो ed.) ऽपि बाह्यो (बाह्यो ] ms.; वामे ed.) ऽवधार्यते, अन्यनिवृत्तिकृतसारूप्यग्रहणात्—इति। (I thank Hisataka Ishida for checking a manuscript of the *Pramāṇavārttikasvavṛttiṭīkā*.); cf. also *Nyāyamañjarī* II 25.11–15 (Kataoka [2009:466(33).5–465(34).3]); *Nyāyakaṇikā* Stern 1386.8–1388.5 (Gosvāmī 131.28–132.7): तथा यदत्यन्तविसदृशानां सादृश्यमापादयति, तदन्यव्यावृत्तिनिष्ठमेव, यथा वराहमहिषमातङ्गादीनामत्यन्तविसदृशानामक्रमेलकत्वम्। तथा चात्यन्तविसदृशानां शाबलेयादिस्वस्वलक्षणानां गोत्वमिति स्वभावहेतुः। तथा ज्ञानप्रतिभासस्य वालीकस्य वा बाह्येन वा परमार्थसता वात्यन्तासरूपेण सादृश्यमन्यव्यावृत्तिकृतमेव कल्पते नान्यथा।; *Nyāyavārttikatātparyaṭīkā* 443.6–9: अपि चात्यन्तविलक्षणानां (°न्तविलक्षणानां ] em.; °न्ताविलक्षणानां ed.) सालक्षण्यमन्यव्यावृत्तिकृतमेव। यथा गवाश्वमहिषमातङ्गानामत्यन्तविलक्षणानामपि सिंहव्यावृत्त्या सालक्षण्यम्। तथा च बाह्यस्य स्वलक्षणस्य विधिरूपस्य परमार्थसतो ऽपरमार्थसतात्यन्तविलक्षणेन सालक्षण्यमिति स्वभावहेतुः।

**6 अपि च ··· न संदिग्धविषयाः** ] Dharmottara's *Apohaprakaraṇa* 594(245).21–25: gaṅ źig ṅes pa'i raṅ bźin ṅes par rtogs par byed pa de ni gźan las ldog pa'i yul can yin te/ dper na 'di ni bum pa kho na'o źes ṅes pa ñid kyi bum pa ṅes par rtogs pa'i rtog pa bźin no// de bźin du rnam par rtog pa thams cad kyaṅ ṅes pa ñid du 'dzin par ñams su myoṅ bas grub pa yin

---

**1 ताद्रू°** ] $A_1G_1K_1$; **तद्रू°** $S_1$ **1 °व्यावृत्ति°** ] $A_1G_1S_1$; **°निवृत्ति°** $K_1$ **1 °पटयोरे°** ] $A_1G_1K_1$; **°पटयोर्ह्ये°** $S_1$ **3 तथा च** ] $A_1G_1K_1$; **यथा च** $S_1$ **3 ऽत्यन्तासन्नत्यन्त°** ] $A_1G_1$; **ऽत्यन्त°** $K_1S_1$ **6 °विषयं दृष्टं ··· एवायमित्य°** $A_1G_1S_1$; ++++++++++++ $K_1$ **6 यथा** ] $A_1G_1$; **यथ** $S_1$ **6 घट** ] $G_1S_1$; **घटपट** $A_1$

वायमित्यघटनिवृत्तिविषयम्। तथा च सर्वे विकल्पा न संदिग्धविषयाः—इत्यनुभवसिद्धमेव।

## [2.4.5 उपसंहारः]

अतो भावाभावसाधारणग्रहणाद् अत्यन्तविसदृशस्य बाह्यत्वग्रहणान् नियतरूपावधारणाच्च तद्व्यावृत्तिनिष्ठा विकल्पाः शब्दाश्च—

no//; *Pramāṇavārttikasvavṛttiṭīkā* 113.8–10: ननु नियतरूपग्राही विकल्पः प्रतिभासते। तेनेतररूपशून्यमेव विकल्पयन्नियतमर्थं विकल्पयति। तस्माद्यन्नियतरूपावधारणम्, तदन्यनिवृत्तिविषयम्। तत्कथमुच्यते विधिरेव शब्दार्थ इति।; *Nyāyamañjarī* II 25.8–10, Kataoka [2009:467(32).11–466(33).3]: नियतरूपता च विकल्पविषयस्य "गौरेव, नाश्वः" इत्येवमवगम्यमाना वस्त्वन्तरव्यवच्छेदमन्तरेण नावकल्पत इति बलाद् व्यवच्छेदविषयत्वम्, अन्यथा नियमपरिच्छेदासंभवात्। संदिग्धं च वस्तु न गृह्यत एव।; *Nyāyavārttikatātparyaṭīkā* 443.12: अपि चायमनुभूयत एव विकल्पविषयो ऽन्यव्यावृत्तिरूपः।

**4 अतो ··· शब्दाश्च** ] Cf. *Nyāyamañjarī* II 25.4–5, Kataoka [2009:467(32).4–6]: अपि च विकल्पभूमिरर्थो विकल्पान्तरसन्निधापितभावाभावापेक्षो नियतरूपो बाह्यसदृशश्च प्रतीयते।; *Nyāyavārttikatātparyaṭīkā* 442.15–16: तच्चेदमन्यव्यावृत्तिरूपं भावाभावसाधारण्याद् अत्यन्तविलक्षणानां सालक्षण्यापादनाच्च तादूप्यानुभवाच्च।; *Nyāyakaṇikā* Stern 1386.1–3 (Gosvāmī 131.24–25): एतच्चारोप्यमाणं रूपमन्यव्यावृत्तिस्वभावम्, भावाभावसाधारणत्वाच्च, अत्यन्तविसदृशानां सादृश्यापादकत्वाच्च, बाह्यसादृश्याच्च।

**1 सर्वे** ] $A_1G_1K_1$; सर्व° $S_1$ **1 न** ] $A_1G_1K_1$; om. $S_1$ **2 संदिग्धविषयाः** ] $A_1G_1$; सन्दिग्धविषयवृत्तय $K_1$; सन्दिग्धवृत्तिविषयवृत्तिरूपा $S_1$ **4 °साधारण°** ] $A_1G_1K_1$; °साधार° $S_1$ **4 ग्रहणा° ··· °वधारणाच्च** ] $A_1G_1$; ग्रहणान्नियतरूपावधारणादत्यन्तबाह्यविसदृशस्य बाह्यत्वग्रहणाद् $K_1$; ग्रहणान्नियतरूपावधारणानत्यन्तबाह्यविसदृशस्य बाह्यत्वग्रहणात् $S_1$ **5 तद्व्या°** ] $S_1$; द्व्या° $A_1G_1$; व्या° $K_1$ **5 °निष्ठा विकल्पाः शब्दाश्च—इति** ] $A_1G_1$; °निष्ठाश्शब्दा विकल्पाश्चेति $K_1$; °निष्ठा विकल्पाश्चेति $S_1$

## [3 बौद्धमतदूषणम्]

—इति यैरुक्तम्, तान् प्रतीदमुत्तरम्। यैरगोनिवृत्तिरूपं विकल्पितमलीकं बाह्यं वाच्यमुक्तम्, तैर्वस्त्वाकारमेव गोत्वं वाच्यमुक्तम्। नात्र वस्त्वाकारसामान्याश्रयणमन्तरेणागोऽपोहवाक्प्रवृत्तिः संभवतीत्यभिप्रायः।

### [3.1 अगोनिवृत्तेराश्रयः]

तथा ह्यगोनिवृत्तिसामान्यं शब्दार्थमाचक्षाणैः किं स्वतन्त्रैवागोनिवृत्तिः शब्देनोच्यत इत्याश्रीयते, अन्यनिष्ठा वा।

#### [3.1.1 अगोनिवृत्तिर्न स्वतन्त्रा]

न तावदनाश्रिताभावसंवित्तिः संभवतीत्युक्तम् "ज्ञानं न जायते किंचित्" इति।

#### [3.1.2 अगोनिवृत्तिर्नान्याश्रिता]

आश्रयो ऽपि न स्वलक्षणमसाधारणत्वादिति वक्ष्यति। साधारणं तु रूपमनिष्टमेव भवताम्।

---

**10 ज्ञानं न जायते किंचिद्** ] *Ślokavārttika abhāva* 16c
**13 वक्ष्यति** ] *Ślokavārttika apoha* 3ab: नेष्टो ऽसाधारणस्तावद्विषयो निर्विकल्पनात्।

---

**2 °रूपं वि°** ] $A_1G_1K_1$; °रूप° $S_1$ **3 बाह्यं वाच्यमु°** ] $A_1G_1$; बाह्यमु° $K_1$ $S_1$ **3 तैर्व°** ] $A_1G_1K_1$; नात्र व° $S_1$ **3 °कारमेव ··· वस्त्वाकार°** ] $A_1G_1$; °कार एव गोत्वम् वाच्यमित्युक्तम् नात्र वस्त्वाकार° $K_1$; °कार° $S_1$(eyeskip) **4 °गोऽपोह°** ] $A_1G_1K_1$; °गोरपोह° $S_1$ **5 संभव°** ] $A_1G_1K_1$; संभ° $S_1$ **7 °निवृत्ति°** ] $A_1G_1S_1$; °निवृत्तिः $K_1$ **7 किं** ] $A_1G_1$; + $K_1$; om. $S_1$ **8 शब्देनोच्यत** ] $A_1G_1$; शब्दैरुच्यत $K_1S_1$ **8 °श्रीयते** ] $A_1G_1K_1$; °श्रयणीयं $S_1$ **8 अन्य°** ] $G_1K_1S_1$; अन्त्य° $A_1$ **10 °भाव°** ] $K_1S_1$; ह्यभाव° $A_1G_1$ **13 वक्ष्यति** ] $A_1G_1K_1$; वक्ष्यते $S_1$

### [3.1.3 नारोपितं रूपमाश्रयः]

नन्वारोपितमेव रूपमगोनिवृत्तेराश्रयो भविष्यति।

### [3.1.3.1 असंकेतविषयः]

न, तस्यापि वाच्यत्वायोगात्। वाच्यं हि तदिष्टं परेषाम्। न चासंकेतविषयो वाच्यो नाम, स्वलक्षणे ऽपि तत्प्रसङ्गात्। न चानुगतिविरहिणः संकेतायतनत्वमसाधारणस्येवारोपितस्य रूपस्योपपन्नम्।

### [3.1.3.2 कल्पनोपादानस्य नानुगतिः]

नाप्यनुगतिः कल्पनोपादानस्य। एवं हि तत्कल्पनोपादानं भव-

---

**8** Cf. *Kāśikā* ad *abhāva* 8 (III 196.10–11): **समारोपितं हि यत्किंचिज्जातीयकं तत्प्रतिविकल्पमन्यदन्यच्च कथमेकशब्दालम्बनं भवेत्।**; *Nyāyakaṇikā* Stern 1400.6–1402.4 (Gosvāmī 133.26–30): **न खलु कल्पनामात्राधीनसत्त्वस्य तद्भेद एकत्वमुपपद्यते। तद्धि तस्यां सत्यां सदिव, तज्जन्मनि जातमिव, तद्विनाशे विनाशीवेति कथं तद्भेदे न भिद्येत। भेदश्चेत्, अशक्यसमयतयाभिलापसंसर्गयोग्यत्वाभावेनालीकं तद्ग्राह्यभावात् स्वलक्षणवन्न विकल्पगोचरः।**; *Nyāyakaṇikā* Stern 1406.6–7 (Gosvāmī 134.18–19): **इदमेव हि कल्पितस्य कल्पनाधीनत्वं यत् कल्पनाभेदाभेदानुविधानं नाम।**; *Nyāyavārttikatātparyaṭīkā* 446.7–9: **अपि च ज्ञानाकारवत् स्वलक्षणवच्चालीकबाह्यत्वमपि न विकल्पगोचरो भवितुमर्हति। तद् विकल्पनाधीनम्, उत्पन्नायां कल्पनायामुत्पन्नमिव, विनष्टायां विनष्टमिव, विकल्पनाभेदे भिन्नमिव, न शक्यमेकत्वेन प्रतिपत्तुम्।**; cf. also *Nyāyakandalī* 679.16–18 (which deals with **विकल्पाकार** and not **अलीक**): **बाह्यत्वेनारोपितो विकल्पाकार विकल्पैकाधीनस्वभावत्वाद् विकल्पे जायमाने जायमान इव, विनश्यति विनश्यन्निव प्रतीयमानः प्रतिविकल्पं भिन्न एवावतिष्ठते। न च भेदानुपातिनी सङ्केतप्रवृत्तिरित्युक्तम्।**

---

**2 भवताम्। नन्वा°** ] $A_1G_1K_1$; **भवतामन्या°** $S_1$ **4 वाच्यं हि तदिष्टं** ] $K_1S_1$; **वाच्यरहितमिष्टं** $A_1G_1$ **5 वाच्यो** ] $A_1G_1K_1$; **बाह्यो** $S_1$ **5 तत्प्रसङ्गात्** ] $A_1G_1K_1$; **प्रसंगात्** $S_1$ **8 °नुगतिः** ] $A_1G_1K_1$; **°नुगति°** $S_1$ **8 °दानस्य** ] $A_1G_1K_1$; **°दानस्य संभवति** $S_1$

ति यदि तदुत्पाद उत्पद्यत इव तन्नाशे नश्यतीव, नान्यथा। अतो विकल्पवत्क्षणिकमिवासाधरणमिवारोपितं रूपमभाजनं संकेतस्येति विकल्पाकारवदगोचरः शब्दानाम्।

[3.1.3.3 आरोपितस्य रूपस्यास्वाभाविकत्वम्]

अथ विकल्पागमयोरप्यनागन्तुकमनपायि च कल्पितं रूपमाश्रीयते। न तर्हि काल्पनिकम्। तथा हि स्वलक्षणवत्तदपि स्वाभाविकमापद्येत। एवमपि तद्वदेव क्षणिकमसाधारणमसंकेतास्पदमगोचर एव शब्दानामिति वृथैव कल्पितसामान्याभ्युपगमः। अक्षणिकत्वे सिद्धान्तप्रतिक्षेपः।

[3.1.3.4 नारोपितानामेकत्वम्]

स्यादेतत्। एकविकल्पारोपिताद्विकल्पान्तरारोपितं विकल्पवद् भि-

---

**11 एकविकल्पा° ··· विकल्पान्तरेण** ] Cf. *Nyāyavārttikatātparyaṭīkā* 442.7–9: तेषां च विकल्पविषयाणां न तैरेव विकल्पैः परस्परतो भेदो गृह्यते, नापि विकल्पान्तरैरिति भेदाग्रहादभेदमभिमन्यते पुरुषः।; *Nyāyakaṇikā* Stern 1384.3–5 (Gosvāmī 131.18–19): न च स्वविषयस्य विकल्पान्तरविषयाद्भेदस्तेनैव गृह्यते नापि विकल्पान्तरेणेति भेदाग्रहादेको विकल्पविषयः।

---

**1** भवति ] $A_1G_1K_1$; संभवति $S_1$ **1** °दुत्पाद उ° ] $A_1G_1K_1$; °दुत्पादादु° $S_1$ **1** °त्पद्यत इव ] $G_1S_1$; °त्पद्यत एव $A_1$; °त्पद्यते इव $K_1$ **1** तन्नाशे न° ] $S_1$; तन्नाशेन न° $A_1G_1$; तन्नाशने° $K_1$ **2** °रोपितं ] $A_1G_1K_1$; °रोपित° $S_1$ **3** °गोचरः ] $A_1G_1K_1$; °गोचर° $S_1$ **5** अथ ] $A_1G_1K_1$; अथ तु $S_1$ **5** °गमयोरप्य° ] em.; °गमापाययोर° $A_1G_1$; एव गमा चा ययोर° $K_1^{ac}$; °गमा चा ययोर° $K_1^{pc}$; °गमापायोरप्य° $S_1$ **6** न ] $K_1S_1$; किं न $A_1G_1$ **6** काल्पनिकम् ] $A_1G_1S_1$; काल्पिकम् $K_1$(marked) **6** स्वलक्षण° ] $A_1G_1S_1$; स्वलक्ष° $K_1$ **6** स्वाभाविकमा° ] $A_1G_1K_1$; भाविकं रूपमा° $S_1$ **7** °पद्येत ] $A_1G_1S_1$; °पद्यते $K_1$ **7** तद्वदेव ] $A_1G_1K_1$; तद्यत एव $S_1$ **8** शब्दानामिति ] $A_1G_1K_1$; शब्दानामसंकेतास्पदगोचर एव शब्दानामिति $S_1$ **8** कल्पित° ] $A_1G_1$; परिकल्पित° $K_1$; परिकल्पितः $S_1$ **9** सिद्धान्त° ] $A_1G_1$; च क्षणिकत्वक्षणिकत्वसिद्ध्या $K_1$; वा क्षणिकसिद्धान्त° $S_1$ **9** °प्रतिक्षेपः ] $A_1G_1S_1$; °हानिः $K_1$ **11** स्यादेतत् ] $A_1G_1S_1$; स्यादेवम् $K_1$ **11** °रारोपितं ] $A_1G_1K_1$; °रोपितं $S_1$

द्यमानमपि न तावत्तेनैव विकल्पेन भिन्नमिति बुध्यते, नापि विकल्पान्तरेण, स्वरूपस्वगोचरयोरेव तयोर्नियमाद् भेदावग्रहे ऽव्यापाराद् भेदानध्यवसायाच्च। अतः सर्वविकल्पारोपितानामेकत्वमारोप्य तत्र शब्दाः संकेत्यन्ते। ततः संकेतसंभवाच्छब्दवाच्यत्वोपपत्तिरिति।

[3.1.3.4.1 प्रतिसंधातुरभावात्]

तन्न, एकस्य प्रतिसंधातुरभावात्। सति ह्येकत्र प्रतिसंधातरि भेदाग्रहादैक्याध्यवसायो भवेत्। न च नैरात्म्यवादिनामसावस्ति।

[3.1.3.4.2 विकल्पस्य प्रतिसंधानानीशित्वम्]

विकल्पास्तु स्वरूपस्वगोचरमात्रप्रचारिणो नान्योन्यस्य विषयं प्रतिसंधातुमीशते। विकल्पारोपितानां भेदानध्यवसायादेकत्वमारोपयन्नरखरविषाणयोरप्यारोपयेत्, निःस्वभावत्वाविशेषात्।

---

**3** *Kāśikā* ad *abhāva* 8 (III 196.11–12): कल्पिताकारभेदानध्यवसायादेकत्वाध्यवसाय इति चेत्।

**7** *Kāśikā* ad *abhāva* 8 (III 196.12–14): कस्य तर्हि, न हि नैरात्म्यवादिनामेकः कश्चिदस्ति प्रतिसंधाता यः पूर्वापरयोरारोपितैकत्वाध्यवसायादेकशब्दं प्रयुञ्जीत।

**10** *Kāśikā* ad *abhāva* 8 (III 196.14–15): विकल्पास्तु क्षणिकाः स्वविषये नियता नान्योन्यस्य विषयमभिनिविशन्त इति कथं प्रतिसंदधीरन्।

---

**1 बुध्यते** ] $A_1G_1K_1$ ; लक्ष्यते $S_1$ **2 स्वरूप°** ] $K_1S_1$ ; स्वरूपम् $A_1G_1$ **2 भेदावग्रहे** ] $A_1G_1K_1$ ; भेदाग्रहे $S_1$ **3 अतः** ] $A_1G_1K_1$ ; om. $S_1$ **3 सर्व°** ] $A_1G_1K_1$ ; सर्वे $S_1$ **3 °मेकत्व°** ] $A_1G_1K_1$ ; °मेक° $S_1$ **7 ह्येकत्र** ] $A_1G_1K_1$ ; ह्येक° $S_1$ **8 °दैक्याध्यवसायो** ] $A_1G_1^{pc}K_1$ ; °दैत्याध्यवसायो $G_1^{ac}$ ; °दैध्यावसायो $S_1$ **10 नान्योन्यस्य** ] $G_1K_1S_1$ ; नान्यान्यस्य $A_1$ **11 °तानां** ] $A_1G_1K_1$ ; °तानां च $S_1$ **11 भेदानध्यव°** ] $A_1G_1K_1$ ; भेदानव° $S_1$ **12 °योरप्या°** ] $A_1G_1S_1$ ; °योरप्येकत्वमा° $K_1$

### [3.1.3.4.3 भेदानवसायः]

कस्य च हेतोरनवसीयमानभेदानामपि विकल्पगोचराणां भेदः। एवं हि ते स्वाभाविकमेवैकत्वं प्रतिपद्येरन्। निःस्वभावत्वादेकत्वं न यदि, न तर्हि भेत्तुमप्यर्हन्ति।

कल्पनोपादानानां तद्भेदादानुमनिको भेद इति चेत्। अवसीयते तर्हि भेद इति न भेदानवसायवशादेकत्वमारोपमर्हति।

### [3.1.3.4.4 महत्यारोपपरंपरा]

महती चेयमारोपपरंपरा स्वरूपभेदतस्तदेकत्वगोचरा, केन प्रयोजनेन बुद्धावनारूढाप्याश्रितेति न विद्मः। उपपादितं हि यथावभासं वस्त्वाकारमेव सामान्यमनेकान्तवादाश्रयणेनाद्यपरिच्छेदे।

---

**2 कस्य च ⋯ भेदः** ] *Nyāyakaṇikā* Stern 1388.5–8 (Gosvāmī 132.7–9): स च ज्ञानाभासो वालीकं वा गोत्वं प्रतिविकल्पं भिद्यमानं सदृशतयानाकलितभेदमप्यश्वादिविकल्पविषयव्यावृत्तमेव बाह्यतयारोप्यत इति नान्यव्यावृत्तिरूपतास्य न प्रथते।
**3 एवं हि ⋯ °रोपमर्हति** ] Cf. *Nyāyakaṇikā* Stern 1406.8–12 (Gosvāmī 134.20–23): यच्चालीकस्य न स्वाभाविके नानात्वैकत्वे इति। अद्धा प्रतीयमानावस्थायां त्वावेदयामः। न भिन्नकल्पनानुयायि शक्यमेकत्वेन प्रतिपत्तुम्, तदनुपातित्वानुपपत्तेः कल्पनाया प्रथनान्तरेण तस्य तत्त्वासंभवात्।
**10 °नाद्यपरिच्छेदे** ] *Ślokavārttika ākṛti*

---

**2 कस्य च** ] $A_1G_1S_1$; कस्य $K_1$ **3 ते स्वा°** ] $A_1G_1K_1$; om. $S_1$ **3 °मेवैकत्वं** ] $A_1G_1$; °मेवकत्व $K_1$; °मेकत्वं $S_1$ **5 तद्भेदा°** ] $A_1G_1K_1^{pc}$; तत्तत्भेदा° $K_1^{ac}$; भेदा° $S_1$ **6 भेदानवसायवशादे°** ] $A_1G_1$; भेदानवसायादे° $K_1$; भेदानध्यवसायादे° $S_1$ **6 °कत्वमारोपमर्हति** ] $A_1G_1$; °कत्वसमारोपः $K_1S_1$ **8 °रोपपरंपरा** ] $A_1G_1S_1$; °रोपरंपरा $K_1$ **8 स्वरूपभेदतस्त°** ] $A_1G_1$; स्वरूपभे° $K_1$; रूपभेदत° $S_1$ **9 °प्याश्रितेति** ] $A_1G_1K_1$; °प्याश्रियत इति $S_1$ **9 हि** ] $A_1G_1K_1$; च $S_1$

### [3.2 अगोनिषेधो गोविधिपूर्वकः]

अपि चागोनिवृत्तिरूपं कल्पितं सामान्यं वाच्यमिच्छतावश्यं गोनिषेधात्मकत्वादगोरादौ गौरेव विधातव्यः, तमन्तरेण प्रसज्यप्रतिषेधानुपपत्तेः। तद्वाच्यो गौर्यत्प्रतिषेधेनागौरपोह्यो गृह्यते। तदिह गोसिद्ध्यागोसिद्धिः, तत्सिद्ध्या च गोसिद्धिरितीतरेतराश्रयम्। यथा वक्ष्यति “गव्यसिद्धे तु” इति। तदभिप्रायं चेदम् “गोत्ववस्त्वेव तैरुक्तम्” इति। अन्यथा दुष्परिहारमितरेतराश्रयमिति भावः।

### [3.3 अतत्कारिणः]

यच्चार्थक्रियासमर्थनार्थमतत्कारिव्यावृत्तं रूपमारोपितो गोशब्दार्थ

---

**2 अपि चागोनिवृत्तिरूपं ⋯ “गव्यसिद्धे तु” इति** ] Cf. *Nyāyakaṇikā* Stern 1402.6–13 (Gosvāmī 134.1–6): न च “अगोव्यावृत्तिरूपतयालीकानामभेदः केषांचित्” इति सांप्रतम्, तत्स्वभावत्वे तेषामन्योन्याश्रयदोषेण ग्रहणाभावप्रसङ्गात्। यथाहात्रभवान् वार्त्तिककारः — सिद्धश्चागौरपोह्येत गोनिषेधात्मकश्च सः। तत्र गौरेव वक्तव्यो नञा यः प्रतिषिध्यते॥ गव्यसिद्धे त्वगौर्नास्ति तदभावे तु गौः कुतः। इति।

**6 गव्यसिद्धे तु** ] *Ślokavārttika apoha* 85ab: गव्यसिद्धे त्वगौर्नास्ति, तदभावे च गौः कुतः॥; the verse is quoted in *Nyāyakaṇikā* Stern 1402.12 (Gosvāmī 134.6).

**7 गोत्ववस्त्वेव तैरुक्तम्** ] *Ślokavārttika apoha* 1c

---

**2 चागोनिवृत्ति॰** ] $K_1S_1$; च गोनिवृत्ति॰ $A_1G_1$ **2 ॰मान्यं वाच्यमि॰** ] $A_1G_1K_1$; ॰मान्यमि॰ $S_1$ **3 ॰दगोरादौ** ] em.; ॰दगोचरादौ $A_1G_1$; ॰त् अगेचरादौ $K_1$; ॰दगवामादौ $S_1$ **3 विधातव्यः** ] $A_1G_1^{pc}K_1$; विधातव्या $G_1^{ac}S_1$ **3 तमन्तरेण** ] $A_1G_1S_1$; क्तमन्तरेण $K_1$ **4 ॰षेधानुपपत्तेः** ] $A_1G_1K_1^{pc}S_1$; ॰षेधो नुपपन्नः $K_1^{ac}$ **4 ॰च्यो गौर्य॰** ] $A_1G_1K_1$; ॰च्यः कौर्य॰ $S_1$ **4 ॰पोह्यो गृह्यते** ] $A_1G_1K_1$; ॰पोह्येत $S_1$ **5 गोसिद्ध्या॰** ] $A_1G_1K_1$; om. $S_1^{ac}$; तत्सिध्या॰ $S_1^{pc}$ **5 ॰श्रयम्** ] $K_1S_1$; ॰श्रयः $A_1G_1$ **5 यथा** ] $A_1G_1K_1$; तथा च $S_1$ **6 गव्यसिद्धे** ] $A_1G_1K_1$; शव्यसिद्धे $S_1$ **6 गोत्ववस्त्वेव** ] $A_1G_1K_1^{pc}S_1$; गोवस्त्वव $K_1^{ac}$ **7 तैरुक्तम्” इति** ] $A_1G_1K_1$; तैरुक्तम् $S_1$ **9 ॰समर्थनार्थम॰** ] $A_1G_1$; ॰समर्थनार्थनम् अ॰ $K_1$; ॰समर्थम॰ $S_1$ **9 रूपमारोपितो** ] $A_1G_1$; समारोपितं $K_1S_1$

इत्युक्तम्। अत्र न विद्मः के तर्हि तत्कारिणो नाम।

[3.3.1 **अर्थक्रियाकारिणः**]

यदि हलवहनाद्यर्थक्रियाकारिणः, एवं तर्हि समानेयमतत्कारिव्यावृत्तिर्महिषाणामपीति तेषामपि गोशब्दवाच्यता भवेत्।

[3.3.2 **एकदर्शनकार्यत्वम्**]

अथैकदर्शनकार्यत्वादेकार्थक्रियाकारित्वम्, न, तेषां यावद्दृश्यं भेदात्। न चैकजातीयत्वेनैकत्वम्, जातेरभावात्।

[3.3.3 **एकप्रत्यवमर्शहेतुत्वम्**]

यच्चैकप्रत्यवमर्शहेतुत्वादेकत्वमुक्तम्, तदयुक्तम्, अवमर्शानामपि दर्शनवद् भेदात्। न चैषामप्येककार्यत्वादभेदः, कार्यान्तराभावात्।

[3.3.4 **विषयाभेदः**]

स्यादेतत्। न कार्याभेदनिबन्धनो ऽवमर्शाभेदः, अपि तर्हि विषया-

---

**1 इत्युक्तम्**] 2.3.3.1
**6 अथै॰ ··· ॰क्रियाकारित्वम्**] See 2.3.3.2.
**9 ॰मुक्तम्**] 2.3.3.3
**12 न कार्या॰ ··· विकल्पानाम्**] Dharmottara's *Apohaprakaraṇa* 598(249).7–12: don mthoṅ ba'i nus pa'i rgyu mtshan can gyi rnam par rtog pa rnams ni 'bras bu tha mi dad pas tha dad pa med par mi brjod kyi/ 'on kyaṅ yul tha mi dad pas so// 'di ltar śiṅ mthoṅ ba las byuṅ ba'i rnam par rtog pa gcig gis don ci 'dra ba sgro btags pa de 'dra bar gźan gyis kyaṅ yin pa'i phyir śiṅ

---

**1 अत्र**] $A_1G_1K_1$; **तत्र** $S_1$ **1 के तर्हि**] $A_1G_1$; **के मी** $K_1S_1$ **1 तत्कारिणो**] $A_1G_1S_1$; **तात्कारिणो** $K_1$ **3 यदि हल॰**] $A_1G_1K_1$; **यदि हवलमवलोद्॰** $S_1$ **3 ॰वहनाद्यर्थ॰**] $A_1G_1K_1S_1^{pc}$; **॰वहनार्थ॰** $S_1^{ac}$ **4 ॰हिषाणाम॰**] $A_1G_1K_1$; **॰हिषानाम॰** $S_1$ **6 अथै॰**] $A_1G_1K_1$; **तथै॰** $S_1$ **6 न, तेषां**] $A_1G_1$; **तन्न, तेषां** $K_1$; **तेषां** $S_1$ **9 यच्चै॰**] $A_1G_1K_1$; **यत्वे॰** $S_1$ **9 अवमर्शा॰**] $A_1G_1K_1$; **प्रत्यवमर्शा॰** $S_1$ **10 चैषामे॰**] $S_1$; **त्वेषामप्ये॰** $A_1G_1K_1$ **12 ऽवमर्शाभेदः, अपि**] $A_1G_1K_1$; **यमपि भेद इति** $S_1$

भेदेन। यादृशो ह्येकेन गोदर्शनभाविना विकल्पेनार्थः समारोपितः, तादृशो ऽपरेणापीति समानविषयत्वादेकत्वं विकल्पानाम्, तदेककार्यत्वेन दर्शनानाम्, तदेकत्वेन च व्यक्तीनामिति।

तन्न, प्रत्युक्तत्वादेकविषयत्वस्य विकल्पानाम्। कल्पनोपादानानां प्रतिविकल्पमारोपितानां भेदात्।

[3.3.5 उपसंहारः]

अतो नासत्येकस्मिन् गोत्ववस्तुनि तदतत्कारिविवेकः शक्यो वक्तुमित्येतदभिप्रायमपीदमुक्तमित्यवसातव्यम्।

[3.4 कल्पिताकारविषयत्वम्]

कल्पिताकारविषयत्वेन च शब्दानां किमपराद्धम्। विधिरूपसामान्येन यत्तत्प्रतीतिसिद्धमतिक्रम्यान्यनिवृत्तिवचनत्वमाश्रीयते।

---

mthoṅ bas byas pa'i rnam par rtog pa rnams don mtshuṅs par źen par byed pa yin no//

**4 प्रत्युक्त°** ] 3.1.3.2

**5 प्रतिविकल्पमारोपितानां भेदात्** ] Cf. *Nyāyavārttikatātparyaṭīkā* ad 2.2.66 (446.18–20): **शक्यसमयतया खल्वभिलापसंसर्गयोग्यता व्याप्ता, अन्यथातिप्रसङ्गात्। सालीकबाह्यतायाः प्रतिविकल्पं भिन्नाया व्यावर्तमानाभिलापसंसर्गयोग्यत्वमपि व्यावर्तयतीति प्रतिबन्धसिद्धिः।**

**8 °मुक्तमि°** ] *Ślokavārttika apoha* 1

---

**1 गोदर्शन°** ] $G_1K_1S_1$ ; **गोर्दर्शन°** $A_1$　**1 समारोपितः** ] $A_1G_1K_1$ ; **समारोपयितुस्** $S_1$　**2 ऽपरेणापीति** ] $A_1G_1K_1$ ; **परेणेति** $S_1$　**3 °र्यत्वेन** ] $A_1G_1$ ; **°र्यत्वेन च** $K_1S_1$　**3 दर्शनानाम्** ] $A_1G_1S_1$ ; **दर्शनानामभेदः** $K_1$　**4 °देक°** ] $G_1K_1S_1$ ; **°देकत्व°** $A_1$　**5 विकल्पानाम्। कल्पनोपादानानां** ] $A_1G_1K_1$ ; **विकल्पनां** $S_1$(eyeskip)　**5 °मारोपिता°** ] $A_1G_1K_1$ ; **°समारोपिता°** $S_1$　**7 शक्यो** ] $A_1G_1K_1$ ; **शक्या** $S_1$　**8 वक्तु°** ] $A_1G_1S_1$ ; **वगन्तु°** $K_1$　**8 °मित्येतद°** ] $A_1G_1$ ; **°मित्य°** $K_1S_1$　**8 °वसातव्यम्** ] $A_1G_1$ ; **°रसन्धातव्यम्** $K_1$ ; **°वधातव्यं** $S_1$　**10 °त्वेन च** ] $S_1$ ; **°त्वे च** $A_1G_1K_1^{pc}$ ; **°त्वे** $K_1^{ac}$　**11 °न्येन यत्त°** ] $A_1G_1K_1$ ; **°न्येनात°** $S_1$　**11 °वचन°** ] $A_1G_1K_1$ ; **°बल°** $S_1$

नन्वेवमस्तु वस्त्वाकारमेव कल्पितं सामान्यं शब्दविकल्पविषयः। तद्धि पारमार्थिकं सत्परीक्षामक्षममाणमारोपिताकारमाश्रीयताम्।

[3.4.1 आरोपिताकारविषयत्वम्]

अस्तु तथा नामेति केचित्। तदयुक्तम्, बाधकाभावात्। तदसद्वादिनामपि तद्रूपप्रत्ययोत्पादात्, सर्वानुपपत्तिपरिहारस्य चोक्तत्वादनेकान्तवादात्।

अपि च वस्तूनामपि विकल्पिते रूपे यावद्विकल्पं भिद्यमाने ऽसाधारणात्मनि संकेतो दुष्कर इत्यशब्दगोचरत्वमेव।

[3.4.2 अवसीयमानाकारविषयत्वम्]

यदि तु तद्विकल्पैर्नारोप्यते, किं त्ववसीयते, एवं तर्हि सर्वविकल्पसाधारणमनपेतं विकल्पापाये ऽपीति बहिरेवोपपद्येत, न तु कल्पितम्।

[3.4.3 आरोपिताकारासाधारणत्वम्]

अपि च को ऽयमारोपिताकारग्रहः। सन्तु व्यक्तय एवान्यव्यावृत्तेराश्रयो विषयश्च विकल्पशब्दानाम्। असाधारणत्वादासां नाभिला-

---

**1** °मेव कल्पितं ] $A_1G_1K_1$; °विकल्पितं $S_1$ **2** °विषयः ] $S_1$; °विषयम् $A_1G_1K_1$ **2** सत्परीक्षा° ] $A_1G_1K_1^{pc}$; सहपरीक्षा° $K_1^{ac}$; सत्यपरीक्षा° $S_1$ **5** तथा नामे° ] $A_1G_1K_1$; तन्नामे° $S_1$ **6** सर्वानुपपत्ति° ] $A_1G_1K_1$; सर्वानुत्पत्ति° $S_1$ **6** °रस्य चोक्त° ] $A_1G_1$; °रस्योक्त° $K_1S_1$ **7** °दनेकान्त° ] $A_1G_1S_1$; °दनैकान्त° $K_1$ **8** वस्तूनामपि ] $S_1$; वस्तुन्यपि $A_1G_1K_1$ **8** विकल्पिते ] $A_1G_1$; विकल्पितस्व° $K_1$; कल्पिते $S_1$ **9** °माने ऽसा° ] $A_1G_1K_1$; °मानासा° $S_1$ **9** इत्यशब्द° ] $A_1G_1K_1$; इति शब्द° $S_1$ **11** °कल्पैर्ना° ] $A_1G_1K_1$; °कल्पो ना° $S_1$ **11** °सीयते, एवं ] $A_1G_1K_1$; °सीयत एव $S_1$ **11** तर्हि ] $A_1G_1K_1$; तत्तर्हि $S_1$ **12** ऽपीति ] $A_1G_1$; ऽपि $K_1S_1$ **12** बहिरेवोपपद्येत ] $A_1G_1$; बहिरेवापाद्येत $K_1S_1$ **13** कल्पितम् ] $A_1G_1$; विकल्पितम् $K_1S_1$ **15** एवान्य° ] $A_1G_1S_1$; एक्तत्वन्य° $K_1$ **1** विकल्प° ] $A_1G_1K_1$; सविकल्प° $S_1$ **1** °दासां नाभि° ] $A_1G_1K_1$; °दासामभि° $S_1$

पसंसर्गार्हत्वमिति चेत्। समानमिदमारोपिताकारे ऽपीत्युक्तम्।

[3.5 निरवशेषपरिदृष्टनिर्भागवस्तु]

यदपि चेदमन्यापोहवचनत्वे शब्दानां कारणमुक्तम् — निरवशेषपरिदृष्टे निर्भागे वस्तुनि न चेदन्यरूपारोपेणान्यापोहः प्रत्याय्येत, न कश्चित्प्रमाणार्थो भवेत्। अतो ऽतत्कारिव्यावृत्त्यैव शब्दलिङ्गानां प्रवृत्तिरिति। उक्तं च —

एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम्।
को ऽन्यो न दृष्टो भागः स्याद्यः प्रमाणैः परीक्ष्यते॥
नो चेद् भ्रान्तिनिमित्तेन संयोज्येत गुणान्तरम्।
शुक्तौ वा रजताकारो रूपसामान्यदर्शनात्॥ इति।

तदयुक्तम्। न हि गवादिदर्शिनां भ्रान्तिपरिगृहीतातद्रूपपरावृत्तिबोधो जायमानो दृश्यते। वक्ष्यति हि “बोधस्तु ज्ञातुर्वस्त्ववलम्बते” इति।

न चास्माकमभागं वस्तु येनैकरूपदर्शी सर्वाकारं विद्यात्। पर्व-

---

**2** **ऽपीत्युक्तम्** ] 3.4.1
**8** **एकस्यार्थस्वभावस्य** ··· **°दर्शनात्** ] *Pramāṇavārttika* I 43–44 (but there the last pāda is **रूपसाधर्म्यदर्शनात्** instead of **रूपसामान्यदर्शनात्**); v. 43 is quoted in *Nyāyamañjarī* II 13.14–15, Kataoka [2011b:596(41).8–9].
**13** **बोधस्तु** ··· **°लम्बते** ] *Ślokavārttika apoha* 92cd, also quoted in *Pramāṇavārttikasvavṛttiṭīkā* 128.28.

---

**2** **°संसर्गार्ह°** ] $A_1G_1S_1$; **°संगार्ह°** $K_1$ **2** **°ताकारे** ] $K_1S_1$; **°ताकारो** $A_1G_1$ **4** **कारण°** ] $A_1G_1K_1$; **कारणत्व°** $S_1$ **5** **°णान्यापोहः** ] $S_1$; **°णान्यः** $A_1G_1$; **°णान्यापोहा** $K_1$ **5** **प्रत्याय्येत** ] $K_1S_1$; **प्रत्याय्यते** $A_1G_1$ **6** **अतो** ] $A_1G_1S_1$; **ततो** $K_1$ **6** **°वृत्त्यैव शब्द°** ] $A_1G_1K_1$; **°वृत्त्यैकश°** $S_1^{ac}$; **°वृत्त्यैकशब्द°** $S_1^{pc}$ **7** **प्रवृत्ति°** ] $A_1G_1K_1$; **वृत्ति°** $S_1$ **8** **°स्वभावस्य** ] $K_1S_1$; **°स्वरूपस्य** $A_1G_1$ **10** **नो** ] $K_1S_1$; **न** $A_1G_1$ **11** **रूपसामान्य°** ] $A_1G_1K_1S_1$; **रूपसाधर्म्य°** PV I 44d (Gnoli 26.13) **12** **°तातद्रूपपरा°** ] $A_1G_1S_1$; **°तातत्पा°** $K_1$ **13** **वक्ष्यति** ] $A_1G_1K_1$; **वक्ष्यते** $S_1$ **13** **°तुर्वस्त्वव°** ] $A_1G_1K_1$; **°तुचित्स्वव°** $S_1$ **2** **°भागं** ] $A_1G_1K_1$; **°लीकं** $S_1$

तादिर्हि स्वरूपमात्रेण प्रत्यक्षपरिदृष्टो धर्मान्तरविशिष्टः प्रमाणान्तरेण साध्यत इति किमनुपपन्नम्।

[3.6 भावाभावसाधारणं रूपम्]

यदपि साधारणग्रहणादन्यनिवृत्तिनिष्ठत्वमुक्तम्, तदपि सभागत्वादेव वस्तुनः प्रत्युक्तम्। वृक्षत्वं ह्यनिर्धारितभावाभावं शब्दादवगतं तयोरन्यतरेण शब्दान्तरादवगतेन संबध्यत इति न नोपपन्नम्।

अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणं यस्य, तस्यैष दोषः स्यात्। नास्माभिश्चैतदिष्यते। न च प्रत्यक्षस्येव शब्दानामर्थप्रत्यायनप्रकारः, येन तद्दृष्ट इवास्त्यादिशब्दापेक्षा न स्यात्, विचित्रशक्तित्वात्प्रमाणानाम्।

अतो भाववचनत्वे ऽपि साधारणग्रहणोपपत्तेर्नास्ति विपक्षे बा-

---

**6** °मुक्तम् ] 2.4.1

**7 सभागत्वादेव ··· संबध्यत** ] Jñānaśrīmitra's *Apohaprakaraṇa* 212.20–21 = Ratnakīrti's *Apohasiddhi* 56.20–22 (first edition): **सभागत्वादेव वस्तुनो नासाधारण्यदोषः** (**नासाधारण्यदोषः** ] em.; **न साधारण्यदोषः** ed.)**। वृक्षत्वं ह्यनिर्धारितभावाभावं शब्दादवगम्यते। तयोरन्यतरेण शब्दान्तरावगतेन संबध्यत इति।**

**9 अस्त्यर्थः ··· °लक्षणं** ] *Vākyapadīya* II 119: **अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणम्। अपूर्वदेवतास्वर्गैः सममाहुर्गवादिषु॥**; The verse is also quoted in *Tattvasaṅgraha* 886.

**10 न च ··· विचित्रशक्तित्वात्प्रमाणानाम्** ] Jñānaśrīmitra's *Apohaprakaraṇa* 213.3–5 = *Apohasiddhi* 56.23–24: **यच्चेदम्। न च प्रत्यक्षस्येव शब्दानामर्थप्रत्यायनप्रकारो येन तद्दृष्ट इवास्त्यादिशब्दापेक्षा न स्यात्। विचित्रशक्तित्वात् प्रमाणानामिति।**

---

**3 °मात्रेण** ] $A_1G_1S_1$; **°मात्रे** $K_1$ **7 °वगतं** ] $A_1K_1S_1$; **°पगतं** $G_1$ **8 शब्दान्तराद°** ] $A_1G_1S_1$; **शब्दाद°** $K_1$ **9 तस्यैष** ] $A_1G_1K_1$; **तस्येत्य°** $S_1$ **10 प्रत्यक्षस्येव** ] $A_1G_1K_1^{pc}S_1$; **प्रत्यक्षस्यैव** $K_1^{ac}$ **10 शब्दा°** ] $A_1G_1K_1$; **सर्वशब्दा°** $S_1$ **11 तद्दृष्ट इवा°** ] $A_1G_1K_1^{pc}$; **तद्दृष्टैवा°** $K_1^{ac}$; **तद्दृष्टैवा°** $S_1$ **1 °माणानाम्** ] $G_1K_1S_1$; **°मानाम्** $A_1$ **2 साधारण°** ] $A_1G_1S_1$; **साधार°** $K_1$ **2 विपक्षे** ] $A_1G_1K_1$; **विषये** $S_1$

धकं प्रमाणम्—इत्यसिद्धायां व्याप्तौ न साधारणग्रहणादन्यनिवृत्तिनिष्ठत्वं शक्यमवसातुम्।

### [3.7 अघटादिशब्दनिदर्शनम्]

अघटादिशब्दनिदर्शनेन चान्यनिवृत्तिपरत्वे साध्यमाने लोकविरोधः, वक्ष्यति च।

> एवं साधनमार्गेण वाच्यावाच्यनिरूपणम्।
> नावतिष्ठत इति ॥ इति।

अपि चाघटशब्दनिदर्शनेनैव घटशब्दो ऽपि घटनिवृत्तिमेवाभिदध्यात्। नासावतः प्रतीयत इति चेत्। अघटनिवृत्तिरप्यतो न प्रतीयत एव। घटं हि घटशब्दो बोधयति, नाघटनिवृत्तिम्।

### [3.8 नियतरूपावधारणम्]

यच्च नियतरूपावधारणादन्यनिवृत्तिविषयत्वम्।

### [3.8.1 हेतोरसिद्धत्वम्]

तदप्ययुक्तम्, स्वार्थस्वरूपमात्रविधायित्वाच्छब्दानाम्। अत एव ते ऽस्त्यादिभिः संबध्यन्ते, इतरथा विरोधपौनरुक्त्ययोरपरिहार्यत्वात्। अतो ऽसिद्धो हेतुः।

---

**6 अघटादि° ··· साध्यमाने** ] See 2.4.2.
**8 एवं ··· °तिष्ठत इति** ] *Ślokavārttika apoha* 176abc
**14 यच्च ··· °विषयत्वम्** ] See 2.4.4.

---

**3 इत्यसिद्धायां** ] $A_1G_1K_1S_1^{pc}$; इति सिद्धायां $S_1^{ac}$ **4 °मवसातुम्** ] $G_1K_1^{pc}$; °मवसलम् $A_1$; °मवधातुम् $K_1^{ac}$; °मनुमातुम् $S_1$ **8 वाच्यावाच्य°** ] $A_1G_1K_1$; वाच्याकार° $S_1$ **9 इति॥ इति** ] $A_1$; इति $G_1K_1S_1$ **11 °वाभिदध्यात्** ] $A_1G_1K_1$; °व ब्रूयात् $S_1$ **11 नासावतः** ] $A_1G_1K_1^{pc}$; नावतः $K_1^{ac}$; नासावितः $S_1$ **11 अघट°** ] $G_1K_1S_1$; अघ° $A_1$ **14 नियतरूपा°** ] $A_1G_1K_1$; नियता° $S_1$ **16 तदप्ययुक्तम्** ] $A_1G_1S_1$; तदयुक्तम् $K_1$ **16 °स्वरूप°** ] $A_1G_1K_1$; °रूप° $S_1$

### [3.8.2 एवकारानर्थक्यम्]

नियतावधारणे चैवकारानर्थक्यम्, घटादिशब्देभ्यस्तदर्थावाप्तेः।

### [3.8.3 हेतोर्विरुद्धत्वम्]

किं चेदं नियतावधारणं वस्तुविषयतामेव साधयति। किंचिद्धि कुतश्चिद् व्यावृत्त्या नियम्यते। असति नियम्ये को नियमार्थः। न चापोहवादिनां नियम्यमस्ति, असाधारणस्याभिलापसंसर्गानर्हत्वात्। एवमेव कल्पितस्य।

न चान्यनिवृत्तिरेव नियम्या। तया ह्यन्यन्नियम्यते, न तु सैव। अत आपन्नं वस्तुरूपमेव सामान्यं नियमवादिनाम्।

### [3.9 बाह्यत्वग्रहणम्]

बाह्यत्वग्रहणं त्वारोपितस्यासिद्धमेव। न खलु वयं किंचिदारोपितमाकारं पश्यामः। प्रागेव तस्य बाह्यत्वम्। न हि शशविषाणं कुतश्चिद्बहिर्भूतं बुद्धौ भवति। परमार्थबहिःसन्तमेवार्थमबाधितया बुद्ध्या बुध्यमाना नात्यन्तविसदृशयोर्बाह्याबाह्ययोरन्यनिवृत्तिरूपं तादृूप्यमवधारयामः।

---

**11 बाह्यत्वग्रहणं** ] See 2.4.3.

---

**2 ॰धारणे** ] $A_1G_1K_1S_1^{pc}$ ; **॰धारणो** $S_1^{ac}$ **2 ॰कारा॰** ] $K_1S_1$ ; **॰कारकरणा॰** $A_1G_1$ **4 साधयति** ] $G_1K_1S_1$ ; om. $A_1$ **5 कुतश्चिद्** ] $K_1S_1$ ; **कुतश्चिद्धि** $A_1G_1$ **5 व्यावृत्त्या** ] $A_1G_1$ ; **व्यावृत्तिं** $K_1S_1$ **5 असति** ] $A_1G_1K_1$ ; **असति तु** $S_1$ **5 नियमार्थः** ] $A_1G_1K_1$ ; **नियामकार्थो** $S_1$ **6 चापोह॰** ] $A_1G_1S_1$ ; **चापोपोह॰** $K_1$ **8 चान्यनिवृत्ति॰** ] $A_1G_1K_1$ ; **च निवृत्ति॰** $S_1$ **8 ह्यन्यन्नियम्यते** ] $A_1G_1S_1$ ; **ह्यन्नियम्यते** $K_1$ **11 बाह्यत्व॰** ] $A_1G_1$ ; **वाह्यत्व॰** $K_1$ ; **बह्यत्व॰** $S_1$ **11 वयं किंचि॰** ] $A_1G_1K_1$ ; **कंचि॰** $S_1$ **13 भवति** ] $A_1G_1K_1$ ; **संभवति** $S_1$ **13 ॰बहिःस॰** ] $A_1G_1K_1$ ; **॰बहिस॰** $S_1$ **13 ॰तमेवार्थ॰** ] $A_1G_1$ ; **॰तमेव त्वर्थ॰** $K_1S_1$ **13 ॰बाधितया** ] $A_1G_1K_1$ ; **॰बाह्यतया** $S_1$ **14 ॰वृत्तिरूपं** ] $A_1G_1$ ; **॰वृत्तिकृतं** $K_1S_1$

### [3.10 असंकेतितत्वम्]

तदयं प्रमाणार्थः—यदशक्यसमयं न तद्वाच्यम्। यथा सुखादीनामात्मा। तथा च परपरिकल्पितं सामान्यम्—इत्युक्तमेव।

तथा—यद्येनाप्रसिद्धसमयं न तत्तस्य प्रतिपादकम्। यथाकाशकुसुमं शशविषाणस्य। अप्रसिद्धसंकेताश्च परपरिकल्पितेन सामान्येन सर्वे शब्दाः।

इह च शब्दानां स्वार्थप्रतिपादकत्वं संकेतप्रसिद्ध्यायत्तत्वेन व्याप्तम्। तद्विरुद्धमप्रसिद्धसंकेतत्वम्। अतो व्यापकविरुद्धोपलब्ध्या शब्दानामन्यापोहविषयत्वनिराकरणसिद्धिः।

### [3.11 व्यावृत्तिः]

अपि च केयं व्यावृत्तिर्नाम, यन्निबन्धनमनेकेषामेकशब्दवाच्यत्वम्।

### [3.11.1 अन्यानन्यविकल्पः]

एषापि हि न वस्त्वाकारसामान्यवदन्यानन्यविकल्पानतिक्रामति।

---

**3 इत्युक्तमेव** ] 2.2.1
**13 एषापि** ··· **°तिक्रामति** ] See 2.1.1.

---

**2 न तद्वाच्यम्** ] $A_1G_1K_1^{pc}$; तद्वाच्यम् $K_1^{ac}$; तन्न वाच्यं $S_1$ **3 परपरिकल्पितं** ] $A_1G_1K_1^{pc}$; परिरपरिकल्पितं $K_1^{ac}$; परिकल्पितं $S_1$ **3 °क्तमेव** ] $A_1G_1S_1$; °क्तम् $K_1$ **4 यद्येना°** ] $A_1G_1$; यद्यद्येना° $K_1$; यद्यत्रा° $S_1$ **4 न तत्तस्य** ] $A_1G_1K_1$; तत्तस्य न $S_1$ **5 परपरिकल्पितेन** ] $K_1S_1$; परिकल्पितेन $A_1$; परकल्पितेन $G_1$ **6 सर्वे शब्दाः** ] $A_1G_1K_1$; सर्वे शब्दाः परपरिकल्पितेन सामान्येन $S_1$ **7 इह च** ] $A_1G_1S_1$; इह $K_1$ **7 °प्रतिपादकत्वं** ] $A_1G_1S_1$; °प्रतिप्रतिपातिदकत्वं $K_1$ **7 °सिद्ध्यायत्तत्वेन** ] $A_1G_1$; °सिद्धिमात्रन्तन्निमित्तन्तेन $K_1$; °सिद्धिमत्वेन $S_1$ **8 °मप्रसिद्ध°** ] $K_1$; °मप्रसिद्धं $A_1G_1$; °म° $S_1$ **9 शब्दानाम°** ] $A_1G_1K_1$; शब्दाम° $S_1$ **9 °विषयत्व°** ] $A_1G_1K_1$; °विषय° $S_1$ **13 वस्त्वाकार°** ] $A_1G_1K_1$; वस्त्वाकारा° $S_1$ **13 °दन्यानन्य°** ] $A_1G_1K_1$; °दनन्यान्यादि° $S_1$

[3.11.2 **वृत्तिः**]

तुल्यश्चास्यामपि वृत्तौ प्रसङ्गः। यदि नास्त्येव, असत्याः कथं प्रत्यवस्थानं प्राक् शब्दप्रयोगात्।

[3.11.3 **व्यावृत्तेः प्रमाणम्**]

अस्याः प्रमाणमन्वेषणीयम्।

[3.11.3.1 **प्रत्यक्षम्**]

तन्न तावत्प्रत्यक्षम्। अर्थेन्द्रियसामर्थ्यसमुद्भवं हि तत्स्वलक्षणमेवालम्बते, न व्यावृत्तिमपरां गोचरयति।

[3.11.3.2 **अनुमानम्**]

नानुमानम्। अत एवापरिदृष्टपूर्वया प्रतिबद्धलिङ्गदर्शनानुपपत्तेः।

[3.11.3.3 **शब्दः**]

न च शब्दैकसमधिगम्येयमिति सांप्रतम्, अगृहीतसंबन्धस्य तस्यावाचकत्वात्, अतिप्रसङ्गात्। तदितरेतराश्रयमापद्येत—शब्दप्रयोगसिद्धेरन्यनिवृत्तिसिद्धिः, तत्सिद्ध्या च शब्दप्रयोगसिद्धिः। लिङ्गत्वे ऽपि शब्दस्यायमेव प्रसङ्गः, तस्याप्यनवगतसंबन्धस्यागमक-

---

**2 तुल्य॰ ··· प्रसङ्गः** ] See 2.1.1.

---

**2 प्रसङ्गः** ] $A_1G_1K_1$ ; **प्रसंग इति** $S_1$   **2 यदि नास्त्येव, असत्याः कथं** ] em.; **यदि नास्त्येवासत्या कथं** $A_1G_1$ ; **यदि नास्त्येव कथमसत्या च** $K_1$ ; **चास्त्येव असत्या च कथं** $S_1$   **3 प्राक्** ] $A_1G_1$ ; **किञ्च प्राक्** $K_1$ ; **प्राक् च** $S_1$   **7 तन्न** ] $A_1G_1K_1$ ; **न** $S_1$   **7 ॰त्प्रत्यक्षम्** ] $A_1G_1K_1$ ; **॰त्प्रक्षम्** $S_1$   **7 ॰सामर्थ्य॰** ] $A_1G_1S_1$ ; **॰सार्थ्य॰** $K_1$   **8 ॰वालम्बते** ] $A_1G_1K_1$ ; **॰वावलंबते** $S_1$   **8 न** ] $A_1G_1K_1$ ; **न तु** $S_1$   **10 ॰पूर्वया** ] $A_1G_1K_1$ ; **॰तया तत्॰** $S_1$   **12 ॰गम्येयमिति** ] $A_1G_1K_1$ ; **॰गम्यो यमिति** $S_1$   **13 ॰धस्य तस्या॰** ] $A_1G_1S_1$ ; **॰धस्या॰** $K_1$   **13 अतिप्रसङ्गात्** ] $A_1G_1K_1^{pc}S_1$ ; **तदित तिप्रसंगात्** $K_1^{ac}$   **14 ॰सिद्धेरन्य॰** ] $A_1G_1K_1^{pc}$ ; om. $K_1$ ; **॰सिद्धावन्य॰** $S_1$   **14 तत्सिद्ध्या** ] $A_1G_1K_1$ ; **तत्सिद्धौ** $S_1$   **15 ऽपि** ] $A_1G_1$ ; **ऽपि च** $K_1S_1$   **15 शब्दस्या॰** ] $A_1G_1K_1S_1^{pc}$ ; **शस्या॰** $S_1^{ac}$

त्वात्, अतिप्रसङ्गात्। अत एव न लिङ्गावगम्यताप्यपोहस्य।

[3.11.4 **अन्यव्यावृत्तिरेका वा नाना वा**]

अपि चेयमेकान्यनिवृत्तिर्नाना वा। न तावन्नाना सत्येकशब्दालम्बनमुपपद्यते। एका तु कथं नानासतां स्वलक्षणानामात्मा भवेत्। तथा हि सा तद्वदेव भिद्येत।

[3.11.5 **सांवृतरूपान्यव्यावृत्तिः**]

स्यादेतत्। किमिदं तत्त्वान्तरमिवान्यापोहमाश्रित्य दूषणान्यभिधीयन्ते। अस्ति तावद्व्यावृत्त्यवग्रहो भावेषु। तन्निबन्धनश्च व्यवहारो नापह्नोतुं शक्यते। तदिदं सांवृतरूपान्यव्यावृत्त्यायत्तमेव सर्वमाश्रयणीयमिति किमत्र परिचोदनाभिः। न हि सांप्रतमित्थं नामेति शक्यनिर्धारणमिति।

न त्वेवं युक्तम्। एवं हि विकल्पविलसितमेव जात्यादीति किमपोहव्यसनेन। वरं वस्तुरूपमेव सामान्यं विकल्पारूढमस्तु व्यवहाराणां कारणम्। एवं हि संविदनुगता भवति। किमसंवेद्यान्यापोहकल्पनया।

---

**1 एव न** ] $K_1$; एवं न शब्द° $A_1G_1$; एव $S_1$ **1 लिङ्गावगम्यताप्य°** ] $A_1G_1$; लिंगागम्यता° $K_1S_1$ **3 अपि चेयमे°** ] $S_1$; अपि च प्रतिविशेषमे° $A_1G_1$; किञ्च प्रतिविशेषमे° $K_1$ **3 °कान्यनिवृत्तिर्नाना वा** ] $A_1G_1S_1$; °का नाना वा निवृत्तिः $K_1$ **3 न तावन्नाना सत्येक°** ] $A_1G_1S_1$; नाना सति नैक° $K_1$ **4 °मुपपद्यते** ] $A_1G_1K_1S_1^{pc}$; °मुपद्यते $S_1^{ac}$ **4 एका तु** ] $S_1$; एका $A_1G_1K_1$ **5 सा** ] $G_1K_1S_1$; स $A_1$ **7 °माश्रित्य** ] $S_1$; °मनुसृत्य $A_1G_1K_1$ **8 °वृत्त्यव°** ] $K_1S_1$; °वृत्ताव° $A_1G_1$ **9 °पह्नोतुं** ] $K_1S_1$; °पहातुं $A_1G_1$ **9 सांवृतरूपान्य°** ] $A_1G_1K_1$; सांप्रत° $S_1$ **9 व्यावृत्त्यायत्तमेव** ] $A_1G_1K_1$; व्यावृत्ताश्रितमेव $S_1$ **9 सर्वमा°** ] $A_1G_1K_1$; समा° $S_1$ **10 न हि सांप्रतमित्थं** ] $A_1G_1$; न हि सांप्रतमेवन् $K_1$; किल हि नासांप्रतमिदं $S_1$ **11 शक्य°** ] $A_1G_1K_1$; शक्ति° $S_1$ **12 न त्वेवं युक्तम्। एवं हि** ] $A_1G_1$; न त्वेवं युक्तम् एवं $K_1$; तन्न एवमप्युक्तमेव $S_1$ **12 °विलसितमेव** ] $K_1S_1$; °विलसिततमेव $A_1G_1$ **12 जात्यादीति** ] $G_1K_1S_1$; जात्यादिति $A_1$ **13 वरं** ] $A_1G_1K_1$; वरं हि विकल्प° $S_1$ **14 किमसं°** ] $A_1G_1K_1$; किं सं° $S_1$

[3.11.6 सामान्यशब्दः]

स्यादेतत्। असत्यप्येकस्मिन् सामान्ये सामान्येष्विव सामान्यशब्दः शाबलेयादिषु गवादिशब्दो वर्तिष्यत इति। तन्न। सामान्यशब्दस्य ह्येकोपाध्यालम्बनत्वमुक्तमेवेति न तेनोपालम्भः। सर्वसामान्यापह्नववादिनस्तूपाधिसामान्यस्याप्यनभ्युपगमान्नौपाधिकत्वोपपत्तिः।

[3.11.7 अनुभवो ऽन्यासंसर्गी]

अपि चैकाकारप्रतिनियतादन्यासंसर्गिणो ऽनुभवादन्योन्यप्रतिक्षेप इति सौगता मन्यन्ते। अन्यासंसर्गी चानुभवः प्रतिस्वलक्षणं तद्वदेवान्योन्यश्चेति नैकशब्दालम्बनं भवेत्। न च सामान्यं स्वलक्षणवदेव।

---

4 ह्येकोपाध्यालम्बनत्वमुक्तमेवेति ] *Ślokavārttika ākṛti* 24: तस्मादेकस्य भिन्नेषु या वृत्तिस्तन्निबन्धनः। सामान्यशब्दः सत्तादावेकधीकरणेन वा॥; *Kāśikā* Adyar ms. No. 63359, p. 2568.1–10: नन्वेवमनन्तास्तस्य शक्तयः कल्पनीया भवेयुः। अत आह—तस्मादिति। यतो न जातिशब्दो ऽयमित्युपपादितम्, अत एकं किंचिदुपाधिमाश्रित्यानेकेष्वेकः शब्दो वर्तत इत्याश्रयणीयम्। अस्ति चासावुपाधिः येयमेकस्यानेकत्र वृत्तिरेकधीकरणं वा। सर्वं खल्वपि सामान्यमेकं सदनेकत्र वर्तते। एकाकारां च धियं कारयतीत्युपपन्नमेकोपाधिकमेकशब्दवाच्यत्वम्। करणेनेति भावे ल्युडिति।; The verse is also quoted in *Pramāṇavārttikasvavṛttiṭīkā* 299.18–19.

---

**2** सामान्ये सामान्येष्विव ] $K_1$; सामान्येष्विव $A_1G_1$; सामान्ये सामान्येष्वेव $S_1$ **4** °कोपाध्यालम्बन° ] $A_1G_1S_1$; °कोपलंबन° $K_1$ **5** °सामान्यस्याप्यन° ] $A_1G_1S_1$; °सामान्यस्यान° $K_1$ **5** °मान्नौपाधिकत्वोप° ] $K_1$; °मान्नौपाधिकत्वौप° $A_1G_1$; °मान्नैकोपाधिकोप° $S_1$ **7** ऽनुभवा° ] $A_1G_1K_1$; ननुभवा° $S_1$ **7** °दन्योन्य° ] em.; °दन्यो नान्य° $A_1G_1K_1$; °दयोजनीयः $S_1$ **8** चा° ] $A_1G_1K_1$; वा° $S_1$ **8** °नुभवः ] $A_1G_1K_1$; °नुभवं $S_1$ **9** तद्वदेवा° ] $A_1G_1K_1$; तद्वदेवावा° $S_1$ **9** नैकशब्दा° ] $A_1G_1K_1$; नैकशब्दप्रयोगा° $S_1$ **9** न च ] $A_1G_1K_1$; न तु $S_1$ **9** सामान्यं ] $A_1G_1K_1$; सामान्य° $S_1$

[3.11.8 उपसंहारः]

अतो न विद्मः—को ऽयमन्यापोहो नाम, यत्प्रत्यवस्थानबीजं तत्रभवताम्।

[3.12 पर्यायत्वापत्तिः]

वस्तुरूपसामान्यापलापे च सर्वशब्दानामेकव्यावृत्तिवचनत्वेन पर्यायत्वापत्तिः। यथा चापोह्यभेदनिबन्धनो नापोहानां भेदः, तथोपरिष्टाद्वक्ष्यति। अतो न वस्तुरूपसामान्यमन्तरेण कथंचिद् विकल्पानां शब्दानां चार्थवत्त्वमुपपादयितुं शक्यम्। यथा चार्थवन्तो विकल्पाः, तथा विस्तरेण सविकल्पकसिद्धावुक्तमेव।

[4 बौद्धमतम्]

यस्तु वदति।

[4.1 जात्यभावः]

नास्ति वास्तवः शब्दानां वाच्यः, जातेरभावादवाच्यत्वात्, उक्तौ च व्यभिचारात्। अत एव विशिष्टाभिधानानुपपत्तिः। बहिरर्थसंस्पर्शरहितास्तु कल्पनाः शब्देभ्यो जायन्ते ताभ्यश्च शब्दा इति शब्दानां

---

**7 तथोपरिष्टाद्वक्ष्यति** ] *Ślokavārttika apoha* 47: ननु चापोह्यभेदेन भेदो ऽपोहस्य सेत्स्यति। स्वतस्तावदभेदः स्यात् परतस्त्वौपचारिकः॥
**9 सविकल्पकसिद्धावुक्तमेव** ] *Ślokavārttika pratyakṣa* 111ff.

---

**2 नाम** ] $A_1G_1S_1$; नामेति $K_1$ **3 तत्रभवताम्** ] $G_1K_1$; तत्रभवन्तम् $A_1$; तत्रभवतां तत्रभवतां $S_1$ **5 वस्तु॰** ] $A_1G_1K_1$; स्व॰ $S_1$ **5 ॰पलापे च** ] $A_1G_1K_1$; ॰पनयेन $S_1$ **5 ॰शब्दानामेक॰** ] $A_1G_1K_1$; ॰शब्दानां चैक॰ $S_1$ **6 चापोह्यभेद॰** ] $A_1G_1$; चापोह्य॰ $K_1$; चापोह्यवाद॰ $S_1$ **7 कथंचिद्** ] $A_1G_1S_1$; om. $K_1$ **9 विस्तरेण सविकल्पकसिद्धावुक्तमेव** ] $A_1G_1$; ++++सविकल्पकसिद्धाव्युक्तमेव $K_1$; सविकल्पकसिद्धावुक्तमेव विस्तरेण $S_1$ **13 वाच्यः** ] $A_1G_1K_1$; वाच्योर्थः $S_1$ **13 उक्तौ** ] em.; युक्तौ $A_1G_1K_1S_1$ **15 बहिरर्थसंस्पर्श॰** ] $A_1G_1K_1$; संसर्ग॰ $S_1$ **15 कल्पनाः** ] $A_1G_1K_1$; विकल्पनाः $S_1$

विकल्पानां च कार्यकारणभावमात्रमेव। यथाहुः—

विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः।
तेषामन्योन्यसंबन्धो नार्थाञ्छब्दाः स्पृशन्ति॥

न च विकल्पा एव वाच्या इति युक्तम्, बहिरर्थावसायाच्छब्दकार्यत्वाच्च विकल्पानाम्।

[4.2 अभिमानः]

कथं तर्ह्यन्यापोहः शब्दार्थ इत्याह। लोकाभिमानमात्रेण। लोकस्य हि प्रतीतिप्रवृत्तिप्राप्तयो बहिरर्थगोचरा दृश्यन्ते। अतो बहिः शब्दार्थ इत्यभिमानः।

[4.3 अपोहः शब्दार्थः]

नन्वेवमपि स्वलक्षणगोचरत्वात्प्रवृत्तिप्राप्त्योः स एव शब्दार्थो भवेत्, नापोहः। अत्राहुः—यदेव तदन्यव्यावृत्तं स्वलक्षणं सैवान्यव्यावृत्तिः, नार्थान्तरम्, अनिरूपणात्। यदाह—"य एवान्यव्यावृत्तः

---

**2 विकल्पयोनयः ··· स्पृशन्ति** ] Source unknown. This verse might be from one of Dignāga's lost works. The verse is quoted in many texts, e.g. *Tātparyaṭīkā* 61.7–8 and *Nyāyamañjarī* I 416.8–9. See Pind [1991:274, n.22] and Ruegg [1993:60, n.3].
**13 य एवा° ··· °व्यावृत्तिः** ] *Pramāṇavārttikasvavṛtti* 32.17: तस्माद्यैव व्या-

---

**1 यथाहुः ··· स्पृशन्ति** ] $A_1G_1K_1$ ; om. $S_1$ **3 नार्थाञ्छब्दाः** ] $K_1$ ; नार्था शब्दा $A_1$ ; नार्थान्च्छब्दा $G_1$ **3 स्पृशन्ति** ] $A_1G_1$ ; स्पृशन्ति इति $K_1$ **4 न च** ] $A_1G_1S_1$ ; न $K_1$ **7 °पोहः शब्दार्थ इत्याह** ] $K_1$ ; °पोहः $A_1G_1$ ; °पोहः शब्दवाच्य इत्याहुः $S_1$ **7 °मानमात्रेण** ] $A_1G_1K_1$ ; °मात्रेण $S_1$ **8 लोकस्य हि** ] $G_1K_1$ ; लोकस्य $A_1$ ; को ह्यस्य हि $S_1$ **8 °प्राप्तयो** ] $A_1G_1K_1$ ; °प्राप्तये $S_1$ **11 °गोचरत्वा°** ] $A_1G_1K_1$ ; °गोचरा° $S_1$ **11 °प्राप्त्योः** ] $A_1G_1K_1$ ; °प्राप्तो यः $S_1$ **12 नापोहः** ] $A_1G_1S_1$ ; नापोहः शब्दार्थ इति $K_1$ **12 अत्राहुः** ] $A_1G_1$ ; अत्राह $K_1$ ; तत्राहुः $S_1$ **12 तदन्य°** ] $A_1G_1S_1$ ; पुनरन्य° $K_1$ **13 °न्यव्यावृत्ति°** ] $A_1G_1K_1$ ; °न्यनिवृत्ति° $S_1$ **13 नार्था°** ] $A_1G_1K_1$ ; वा नार्था° $S_1$ **13 °रम्, अ°** ] $K_1$ ; °राव्यावृत्तिः शब्दार्थ इत्यागम° $A_1G_1$ ; °रमपि $S_1$

सैवान्यव्यावृत्तिः” इति।

[4.4 विजातीयव्यावृत्तेन रूपेण स्वलक्षणं शब्दार्थः]

किमिदानीं स्वलक्षणं शब्दार्थः। सत्यम्। विजातीयव्यावृत्तेन रूपेण। यद्यपि च सजातीयेभ्यो ऽपि स्वलक्षणं व्यावृत्तम्, तथापि तद्रूपं न शब्दे प्रतिभासत इति न शब्दार्थः।

[4.5 अनुगतरूपनिरासः]

अनुगतं तु रूपं व्यावृत्तात्मनामपश्यन्तो न तच्छब्दार्थं समर्थयामहे।

[4.6 उभयसिद्धम्]

व्यावृत्तं तु रूपमुभयसिद्धं युक्तं यदभिनिविशन्ते शब्दा इति।

[4.7 शब्दा अविद्यास्वभावाः]

नन्वेवं सजातीयविजातीयव्यावृत्ते स्वलक्षणे विजातीयव्यावृत्त्यात्मनोच्यमाने सजातीयव्यावृत्तेरपि तदभेदादभिधानं भवेत्।

स्यादेतदेवम्, यदि पारमार्थिकः स्वलक्षणसंस्पर्शो भवेच्छब्दानाम्। अविद्यास्वभावास्तु शब्दा विकल्पाश्चेति न सर्वप्रकारप्रती-

---

वृत्तिः स एव व्यावृत्तः।

**9** °मुभयसिद्धं ] See 2.4.2.

---

**1** सैवान्य° ] $A_1G_1S_1$; स एवन्य° $K_1$ **4** यद्यपि च ] $A_1G_1S_1$; यद्यपि $K_1$ **5** प्रतिभासत ] $K_1S_1$; सति भासत $A_1G_1$ **7** °वृत्तात्मनामपश्यन्तो ] $A_1G_1K_1$; °वृत्तानामप्यपश्यंतो $S_1^{ac}$; °वृत्तानामपश्यंतो $S_1^{pc}$ **9** व्यावृत्तं तु रूपमु° ] $S_1$; व्यावृत्तरूपमु° $A_1G_1K_1$ **9** °भयसिद्धं ] $A_1G_1K_1$; °भयवादिसिद्धं $S_1$ **9** °निविशन्ते ] $K_1S_1$; °निवेशन्ते $A_1G_1$ **11** स्वलक्षणे ] $A_1G_1S_1$; स्वलक्षणे पि $K_1$ **12** तदभेदाद° ] $A_1G_1$; तदभेदात् तद° $K_1S_1$ **13** °देवम् ] $A_1G_1K_1$; °देकं $S_1$ **13** °मार्थिकः स्व° ] em.; °मार्थिकस्व° $A_1G_1K_1$; °मार्थिकं स्वस्य $S_1$ **14** अविद्या° ] $A_1G_1K_1$; अविद्यमान° $S_1$ **14** °स्वभावास्तु ] $A_1G_1K_1S_1^{pc}$; °स्वभास्तु $S_1^{ac}$ **14** °ब्दा विकल्पाश्चेति ] em.; °ब्दविकल्पा इति $A_1G_1K_1^{pc}$; °ब्दा विकल्पा इति $K_1^{ac}$; °ब्दविकल्पाश्चेति $S_1$ **14** सर्वप्रकार° ] em.; सर्वप्रमाण° $A_1G_1$; सर्वाकार° $K_1S_1$

तिदोषः। अभिमानमात्रेण तु बहिरर्थाध्यवसायो जायत इति तदभिप्रायं वाच्यवाचकभावाश्रयणं शब्दार्थयोः। स्वलक्षणस्य च व्यावृत्तस्वभावत्वादपोहवाच्यत्वाभिमानः। परमार्थेन तु शब्दलिङ्गाभ्यां बाह्यार्थरहितः प्रत्यय एव जन्यते।

[4.8 वस्तुप्रतिलम्भः]

अवस्तुसंस्पर्शे ऽपि च वस्तुप्रतिबन्धात्तत्प्रतिलम्भः। कथमप्रत्ययविपरिवर्तिनो वस्तुनः प्रतिलम्भ इति चेत्, न प्रत्ययविपरिवृत्तिर्वस्तुलाभे हेतुः, वस्तुसत्त्वं तु, केशदर्शने तदलाभात्। पश्यति हि तैमिरिकः केशान्, न तु लभते। तत्कस्य हेतोः। अभावात्। दर्शनाधीने तु प्रतिलम्भे तानपि प्रतिलभेत। प्रवृत्तस्तु यथा तथाभिमानमात्राद्वस्तु लभते। तल्लाभाच्चाविसंवादं मन्यते।

[4.9 उपसंहारः]

अतो विकल्पमात्रहेतवः शब्दा लिङ्गं च परमार्थतः। लोकाभिमानमात्रेण तु शब्दलिङ्गगम्यत्वमपोहस्याश्रितमिति।

---

**1 °तिदोषः** ] $K_1S_1$; °तिर्दोषः $A_1G_1$ **1 °मात्रेण** ] $A_1G_1$; °मात्रं $K_1S_1$ **1 बहिर°** ] $A_1G_1K_1^{pc}S_1$; बहिरहिर° $K_1^{ac}$ **1 °र्थाध्यवसायो** ] $A_1G_1K_1^{pc}$; °र्थे वध्यवसायो $K_1^{ac}$; °र्थावसाये $S_1$ **2 °श्रयणं** ] $A_1G_1K_1$; °श्रयं $S_1$ **2 °लक्षणस्य** ] $A_1G_1K_1$; °लक्षणं सा $S_1$ **3 °भिमानः** ] $S_1$; °भिधानम् $A_1G_1K_1$ **4 °भ्यां बाह्या°** ] $A_1G_1$; °भ्याम° $K_1$; °भ्यां वाक्या° $S_1$ **4 प्रत्यय** ] $A_1G_1K_1$; प्रत्यक्ष $S_1$ **4 एव** ] $A_1G_1K_1^{pc}S_1$; एवं $K_1^{ac}$ **6 च वस्तु°** ] $A_1G_1K_1$; तद्वस्तु° $S_1$ **6 °तिलम्भः** ] $A_1G_1K_1$; °तिबंधः $S_1$ **7 वस्तुनः प्रतिलम्भ** ] $A_1G_1$; वस्तुनो पालाभ $K_1^{ac}$; वस्तुनो लाभ $K_1^{pc}S_1$ **8 °लाभे हेतुः, वस्तुसत्त्वं तु, केशदर्शने** ] em.; °लाभे हेतुः वस्तुसत्वं --र्शने $A_1G_1$; °लाभहेतुर्वस्तुसत्ता केशदर्शने $K_1$; °लाभे हेतुः वस्तुसत्ता तु केशदर्शने $S_1$ **8 तदला°** ] $A_1G_1K_1$; तवला° $S_1$ **9 तु** ] $A_1G_1K_1$; तु तां $S_1$ **9 अभावात्** ] $A_1G_1K_1$; अभात् $S_1$ **10 तथा°** ] $S_1$; तथा वा° $A_1G_1K_1$ **11 °भाच्चा°** ] $A_1G_1K_1$; °भाद्वा° $S_1$ **14 तु** ] $A_1G_1S_1$; om. $K_1$ **14 °लिङ्गगम्य°** ] $A_1G_1K_1$; °लिंगावसेय° $S_1$

## [5 बौद्धमतनिराकरणम्]

तदिदमनुपपन्नम्।

### [5.1 जातेरभावः]

तथा हि—यत्तावदुक्तम् अभावाज्जातेरवाच्यत्वम् इति, तदयुक्तम्, यथादर्शनमुपपादितत्वात्तद्भावस्य—“न प्रत्यक्षा सती साध्या भवितुमर्हति” इति। दोषपरिहाराश्चोक्ताः प्रथमपरिच्छेदे, वक्ष्यते च। अर्थक्रियाकारित्वमपि “आकृतिस्तु क्रियार्थत्वात्” इत्यत्राभिधास्यते। अतः प्रत्यक्षसिद्धापलापे स एव शून्यवादः। निराकृतश्चासौ।

### [5.2 अभिमानः]

यत्तु जनाभिमानादपोहवाच्यत्वमिति। यद्यस्ति जनानुरोधः “बहिःसन्तमेवानुगतमाकारं लोकः शब्दलिङ्गाभ्यां बुध्यते” इति, तथैवाश्रयणीयम्। तदभावस्तु प्रत्युक्त एवेति।

---

**4 यत्तावदुक्तम्** ] See 4.1.

**5 न प्रत्यक्षा सती साध्या भवितुमर्हति** ] *Śābarabhāṣya* ad 1.1.5a, Frauwallner 40.14–15.

**6 प्रथमपरिच्छेदे** ] *Ślokavārttika ākṛti*

**7 आकृतिस्तु क्रियार्थत्वात्** ] *Jaiminisūtra* 1.3.33

**8 निराकृतश्चासौ** ] *Ślokavārttika śūnya*

**10 यत्तु ··· °मिति** ] See 4.2.

**12 प्रत्युक्त** ] *Ślokavārttika ākṛti*

---

**2 तदिदमनु°** ] $S_1$; तदनु° $A_1G_1$; तथा हि तदनु° $K_1$ **5 °त्तद्भावस्य** ] $A_1G_1$; °त्तद्सद्भावस्य $K_1S_1$ **6 प्रथमपरिच्छेदे** ] $A_1G_1S_1$; om. $K_1$ **6 वक्ष्यते च** ] $A_1G_1K_1$; वक्ष्यन्ते $S_1$ **7 °त्वमपि** ] $A_1G_1K_1$; °त्वमप्याकृतेः $S_1$ **8 °सिद्धा°** ] $A_1G_1K_1$; °सिद्धाकृत्° $S_1$ **10 °वाच्यत्वमिति** ] $A_1G_1K_1$; °वाच्यत्वं $S_1$ **12 प्रत्युक्त एवेति** ] $A_1G_1K_1$; प्रत्युक्तः $S_1$

### [5.3 नापोहो वाच्यः]

किं चेदम्—तदभावादपोहो वाच्य इति। एवं शशविषाणमेव किं नोच्येत, अप्रतिभासाविशेषात्। प्रतीयते स्वलक्षणमिति चेत्। तत्तर्हि वाच्यं न व्यावृत्तिः। तदेव व्यावृत्तिर्नार्थान्तरमिति चेत्। तदवस्थमानन्त्यं तत्र।

### [5.4 न निवृत्तिः सजातीयानुगता]

सजातीयानुगतान्यनिवृत्त्यभ्युपगमे तूक्तम्। कथं हि व्यावृत्तात्मनां व्यावृत्तिरप्यनुगता भवेत्।

### [5.5 जातिसमर्थनम्]

कश्चायमसत्यां जातौ सजातीयेतरविभागः। असत्यामपि जातौ केचिदेव स्वभावात्सजातीयादिविकल्पकारणमिति चेत्। न, प्रतिस्वलक्षणं स्वभावभेदात्। अनुगतः स्वभावो नानात्मनामनुपपन्न एव। विजातीयव्यावृत्तं च रूपमभिदधानाः शब्दास्तदभेदात्सजातीयव्यावृत्तिमप्यभिदध्युः।

---

**2 किं चेदम् ··· वाच्य इति** ] See 4.3.
**5 तदवस्थमानन्त्यं** ] See 3.11.4.
**7 सजातीयानुगतान्यनिवृत्त्यभ्युपगमे** ] See 4.4.
**7 तूक्तम्** ] See 3.11.4.
**10 °मसत्यां जातौ** ] See 4.5.

---

**2 °दपोहो** ] $A_1G_1K_1$; **°दन्यो** $S_1$ **2 एवं** ] $A_1G_1$; **एवं हि** $K_1$; om. $S_1$ **2 °विषाणमेव** ] $K_1$; **°विषाण एव** $A_1G_1S_1$ **3 अप्रतिभासाविशेषात्** ] $A_1G_1K_1^{pc}S_1$; **अप्रतिभासायोगामविशेषात्** $K_1^{ac}$ **4 तदेव** ] $A_1G_1$; **सैव** $K_1S_1$ **4 °र्नार्था°** ] $G_1K_1S_1$; **°र्वार्था°** $A_1$ **5 °मानन्त्यं तत्र** ] $A_1G_1K_1$; **°मन्येन** $S_1$ **7 सजातीयानु°** ] $A_1G_1$; **सजातीयान्यनु°** $K_1$; **सजातीनु°** $S_1$ **7 °तान्यनिवृत्त्यभ्यु°** ] $A_1G_1^{pc}K_1$; **°तान्यनिवृत्तित्यभ्यु°** $G_1^{ac}$; **°तानुवृत्तिताभ्यु°** $S_1$ **7 व्यावृत्तात्मनां** ] $S_1$; **व्यावृत्तानां** $A_1G_1$; **व्यवृत्तानां** $K_1$ **11 न** ] $G_1K_1S_1$; **तन्न** $A_1$ **12 अनुगतः** ] em.; **अनुगतस्तु** $A_1G_1K_1$; **अनुगत°** $S_1$ **13 °मभिदधानाः शब्दास्त°** ] $A_1G_1K_1$; **°मभिधानशब्दात्त°** $S_1$ **14 °त्तिमप्यभिदध्युः** ] $A_1G_1$; **°त्तमप्यभिदध्युः** $K_1$; **°त्तिसमाभिदध्युः** $S_1$

### [5.6 विकल्पा नाविद्यामात्रम्]

यत्तु न स्वलक्षणसंस्पर्शः पारमर्थिकः, अविद्यामात्रं विकल्पाः—इति न सर्वप्रकारप्रतीतिरिति। ननूक्तम्—अस्तु वस्त्वाकारमेव सामान्यं कल्पनाघटितं शब्दार्थः, किमपोहग्रहेणेति। निर्मथ्यमानेन विदूरमपि गत्वा यद्यविद्यैव शरणमालम्बनीया, अस्तु वस्त्वाकारमेव सामान्यमविद्याकल्पितमालम्बनमित्युक्तमेव। बाधकाभावे ऽपि चाविद्याभिधानमविद्यैव।

### [5.7 वस्तुप्रतिलम्भः]

यदि चार्थासंस्पर्शिनो विकल्पाः, कथं तेभ्यो वस्तुलाभः। वस्तुसत्तामात्रेणेति चेत्। न, असत्स्वपि विकल्पेषु तल्लाभप्रसङ्गात्। अस्ति हि तत्तदानीमपीति किं न लभ्यते। कथमप्रवृत्तो लभत इति चेत्। अप्रवृत्तिरेव कुतः। अदर्शनादिति चेत्। दृष्टं तर्हि विकल्पोदये वस्त्विति कथमवस्तुसंस्पर्शित्वं विकल्पानाम्। दृष्टवस्त्वभिमानेन तत्प्रवृत्तिरिति चेत्। को ऽयमभिमानो नाम। अन्यो वस्तुप्रतिभासाद्

---

**2 यत्तु ··· °प्रतीतिरिति** ] See 4.7.
**3 ननूक्तम्** ] See 3.11.5.
**6 °त्युक्तमेव** ] See 3.11.5.
**9 यदि चा° ··· वस्तुलाभः** ] See 4.8.

---

**2 °संस्पर्शः** ] $A_1G_1^{pc}K_1$; °संस्पर्शम° $G_1^{ac}$; °स्वरस $S_1$ **3 सर्वप्रकार°** ] $A_1G_1$; सर्वाकार° $K_1S_1$ **3 ननूक्तम्—अस्तु** ] $A_1G_1K_1$; ननूक्तमत्रास्तु $S_1$ **4 निर्मथ्यमानेन** ] $A_1G_1$; निबध्यमानेन $K_1$; निर्बध्यमानेन $S_1$ **5 विदूरमपि** ] $A_1G_1K_1$; दूरमपि हि $S_1$ **7 °भावे ऽपि चावि°** ] $K_1S_1$; °भावे ऽवि° $A_1G_1$ **7 °द्याभिधानम°** ] $A_1G_1K_1$; °द्याविद्यमानम° $S_1$ **9 यदि चा°** ] $G_1K_1S_1$; यैश्चा° $A_1$ **9 तेभ्यो** ] $A_1G_1S_1$; तो $K_1^{ac}$; ते $K_1^{pc}$ **11 °मपीति** ] $A_1G_1K_1$; °मिति $S_1$ **11 °प्रवृत्तो लभत** ] $A_1G_1K_1$; °प्रवृत्तौ लभ्यत $S_1$ **12 अदर्शनादिति चेत्। दृष्टं** ] $A_1G_1K_1$; अदृष्टं $S_1$ **12 तर्हि** ] $A_1G_1K_1$; तद् $S_1$ **13 विकल्पानाम् ··· सजातीय°** ] $A_1G_1K_1^{pc}S_1$; विकल्पानान्दृष्टवस्त्वभिमानेस्सजातीय° $K_1^{ac}$ **13 दृष्ट°** ] $A_1G_1K_1^{pc}$; न दृष्टं $S_1^{ac}$; दृष्टं $S_1^{pc}$ **14 तत्प्रवृत्ति°** ] $A_1G_1K_1^{pc}$; प्रवृत्ति° $S_1$

यन्निबन्धनो वस्तुलाभः। नन्वयं वस्तुप्रतिभास एवेति वस्तुसंस्पर्शिनो विकल्पाः सजातीयव्यावृत्तिमपि किं न प्रतिभासयन्ति।

[5.8 उभयसिद्धम्]

यत्तूभयवादिसिद्धाभावानां व्यावृत्तिरर्थः शब्दानामिति। अस्तु तर्हि ज्ञानमुभयसिद्धं स्वरूपं वा शब्दानामर्थः। तन्न तेभ्यो ऽवगम्यत इति चेत्। व्यावृत्तिर्वा किमवगम्यते यः शब्दार्थो भवेत्। उक्तमिदम्—"बोधो वस्त्ववलम्बते" इति।

अपि च स्वलक्षणानां भावात्मकमेव रूपमुभयसिद्धमर्थः किं नेष्यते। एवं हि वस्त्वाकारप्रतीतिरुपपादिता भवति। व्यभिचारात् तदवाच्यमिति चेत्। यदि व्यावृत्तिरपि व्यावृत्तादनन्येति समानो व्यभिचार इत्युक्तमेवेति यत्किंचिदेतत्।

---

**4 यत्तूभय° ··· शब्दानामिति** ] See 4.6.
**7 बोधो वस्त्ववलम्बते** ] *Ślokavārttika* 92cd: **बोधस्तु ज्ञातुर्वस्त्ववलम्बते॥**; see 3.5.
**11 इत्युक्तमेवेति** ] 5.5

---

**1 वस्तुप्रतिभास** ] $S_1$; **प्रतिभास** $A_1G_1$; **प्रतिभा+** $K_1^{pc}$ **2 °संस्पर्शिनो विकल्पाः** ] $S_1$; **°संस्पर्शिनो ऽपि विकल्पाः** $A_1G_1$; **+स्पर्शिनो ++ल्पास्** $K_1^{pc}$ **2 °वृत्तिमपि** ] $A_1G_1K_1$; **°वृत्तिं** $S_1$ **4 यत्तूभय°** ] $A_1G_1S_1$; **यत्तूक्तमुभय°** $K_1$ **4 °त्तिरर्थः शब्दानामिति** ] $A_1G_1K_1$; **°त्तिः शब्दानामर्थ इति** $S_1$ **4 अस्तु** ] $A_1G_1S_1$; **वस्तु** $K_1$ **5 °मुभय°** ] $A_1G_1K_1$; **°मुभयवादि°** $S_1$ **5 तन्न** ] $A_1G_1K_1$; **न** $S_1$ **5 तेभ्यो** ] $A_1G_1K_1$; **तत्तेभ्यो** $S_1$ **6 यः शब्दा°** ] $A_1G_1$; **यो शब्दा°** $K_1$; **यच्छब्दा°** $S_1$ **9 °ष्यते** ] $K_1S_1$; **°ष्यत इति** $A_1G_1$ **9 भवति** ] $A_1G_1K_1^{pc}S_1$; **भवति अस्तु तर्हि ज्ञानमुभयसिद्धं स्वरूपम्** $K_1^{ac}$ **10 तदवाच्यमिति चेत्** ] $A_1G_1$; **तादवागम्यच्यमिति चेत्** $K_1^{ac}$; **तादवाच्यमिति चेत्** $K_1^{pc}$; **तदवाच्यं** $S_1$ **10 यदि व्यावृत्तिरपि** ] $A_1G_1S_1$; **वृत्तिरपि** $K_1$ **10 व्यावृत्ताद°** ] $A_1G_1K_1$; **व्यावृत्ताद्न°** $S_1$ **11 इत्युक्तमेवेति** ] $S_1$; **इत्युक्तमिति** $A_1G_1K_1$

[5.9 उपसंहारः]

सर्वं चैतदभिप्रेत्य वार्त्तिककारेण "अगोनिवृत्तिः सामान्यम्" इत्युक्तम्। स एष वक्ष्यमाणाशेषप्रकरणार्थसंग्रहश्लोकः। अस्यैव तूत्तरप्रपञ्चः। तथा हि "भावान्तरमभावो हि" इत्यादिना "तस्माद् वस्तुन्यपोहाः स्युः" इत्यन्तेन स्वतन्त्राभावसंवित्तिर्निराकृता, असाधारणालम्बनत्वं च प्रत्युक्तम्। तत्सर्वमिहैव संक्षिप्योक्तम्, विवृतं चास्माभिः। तथा पर्यायत्वापादनादावपि वक्ष्यमाणे प्रपञ्चे सामानाधिकरण्याभावादिदोषप्रसङ्गपरिहारसाधारण्ये चायमेवावहितेन मनसा भावयितव्य इत्यलमनेनेन।

---

**2** अगोनिवृत्तिः सामान्यम्] *Ślokavārttika apoha* 1a
**4** भावान्तरमभावो हि] *Ślokavārttika apoha* 2a
**4** तस्माद् वस्तुन्यपोहाः स्युः] *Ślokavārttika apoha* 35a

---

**2** चैतद°] $A_1G_1$; चेदम° $K_1S_1$ **3** °त्युक्तम्] $A_1G_1K_1$; °त्याद्युक्तं $S_1$ **3** स एष] $A_1G_1S_1$; स एव $K_1$ **3** अस्यैव] $A_1G_1K_1$; तस्यैव $S_1$ **4** तूत्तर°] $A_1G_1K_1$; तूत्तः $K_1$ **6** °णालम्बनत्वं च] $A_1G_1K_1$; °णार्थालंबनं तु $S_1$ **8** °प्रसङ्ग°] $A_1G_1K_1$; om. $S_1$ **8** °परिहार°] $A_1G_1K_1$; °परिहारार्थं $S_1$ **8** °वावहितेन] $A_1G_1K_1$; °व ग्रंथो वहितेन $S_1$ **9** भावयितव्य इत्यलमनेन] $A_1G_1$; भावयितव्य इत्यलमनेन इति $K_1$; भावयितव्यो लमतिप्रसंगेन $S_1^{ac}$; भावयितव्य इत्यलमतिप्रसंगेन $S_1^{pc}$